फाल्गुनमासः
वर्षम् – ६८
चतुर्थोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ फरवरी २०१८

ISSN 2249-698X


# भारती


## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



**अमृतं प्रेष्य लोकेभ्यः पीतं येन विषं स्वयम्।**
**शिवरात्रौ जनैः सर्वैः पूज्यतेऽसौ सदाशिवः॥**





## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | कोर्पोरेटजातककथा | ऋषिराजजानी | ६ |
| ५ | पञ्चरूप्यकाणि | डॉ. हर्षदेव माधवः | ८ |
| ६ | सा कन्यका मौक्तिकहारतुल्याआचार्य | डॉ. राजेशकुमारगुप्तः | ९ |
| ७ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १० |
| ८ | वस्तुसेवाकरः ( G.S.T. ) | डॉ. हर्षदेव माधवः | ११ |
| ९ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १२ |
| १० | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १३ |
| ११ | पण्डितमधुसूदन ओझा-विरचितज्योतिषचक्रम्..... | अञ्जना शर्मा | १४ |
| १२ | भारतस्य पर्वताः | अविनाश शर्मा | १५ |
| १३ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | १६ |
| १४ | अश्वस्य संस्कृतशिक्षकः पण्डितः | डॉ. प्रशस्यमित्रः शास्त्री | १७ |
| १५ | संस्कृत समाचारः | प्रबंधसंपादकः | १८ |
| १६ | राजस्थाने संस्कृतपरम्परा | अभिनव शर्मा | १९ |
| १७ | संस्कृत समाचारः | प्रबंधसंपादकः | २२ |
| १८ | डॉ. रामकुमारदाधीचस्य व्यक्तित्वं कृतित्वञ्च | बिमला मील | २३ |
| १९ | रोगविचारप्रसङ्गे ग्रहाणां परिचयः | डॉ. किरण शर्मा | २५ |
| २० | ज्योतिषशास्त्रे पाचनतन्त्ररोगविचारः ....... | नवनीतकुमारः | २७ |
| २१ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २२ | गीता-पाठ प्रतियोगिताया-आयोजनम् | सन्तोष शर्मा | ३१ |
| २३ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयलः

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

दक्षो यं जगतः गुरुं नहि ददौ सम्मानितं स्वासनम्,
आद्यन्तं न विदुर्महामुनिगणा यस्य प्रभोरीशितुः।
यज्ञध्वंसमकारयन्निजगणैर्दक्षस्य यो हेलया,
देवैर्वन्दितपादपद्मयुगलं शम्भुं नमामो वयम्।।

## मासावतरणम्

मन्दं याति शनैः शनैः समधिकं शैत्यं सदा फाल्गुने,
सेवन्ते न सुखाय भानुकिरणान् शीताद्विमुक्ता नराः।
उद्यानेषु सुखाय यान्ति युवकाः साकं प्रियाभिर्मुदा,
सोल्लासं मदनोत्सवे प्रमुदिता नृत्यन्ति गायन्ति च।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

फाल्गुनमासः

वर्षम् 68

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074

फरवरी, 2018

अङ्कः - 4

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# समयः समागतो राममन्दिरनिर्माणस्य

...✍ पं. प्यारेमोहनशर्मा

द्विनवत्युत्तरोनविंशतितमख्रिष्टस्य दिसम्बरमासस्य षष्ठे दिनाङ्के कारसेवकाः बाबरीमुन्मूल्य तत्र रामललायाः मूर्तिमस्थापयन्। ततः प्रभृति अद्यावधि तत्र भगवतो रामस्य पूजाकर्म प्रचलति। पञ्चविंशतिवर्षाणि व्यततानि। कारसेवकानां बलिदानानिअस्माभिः स्मर्तव्यानि मन्दिरनिर्माणाय प्रयत्नाः विधेयाश्च।

अष्टत्रिंशदधिकोनविंशतितमे ख्रिष्टाब्दे मईमासस्य षोडशतमे दिनाङ्के सरसंघचालकाः बालासाहब-देवरसमहोदया हरिद्वारे विश्वहिन्दूपरिषदं तथा राष्ट्रीय स्वयंसेवकसंघस्य कार्यकर्तॄनप्रेरयन् यद् युष्माकं प्रान्ते श्रीरामाः निगडिताः वर्तन्ते। मुक्ति-आन्दोलनं चालयन्तु। तेषां प्रेरणया साधुजनानां धर्माचार्याणां च मार्गदर्शने विश्वहिन्दूपरिषत् रामजन्मभूमिमुक्ति-आन्दोलनं प्रावर्तत। आन्दोलनाय शङ्कराचार्या स्वामिनो वासुदेवनन्दाः, परमहंसाः रामचन्द्रदासाः अन्ये च धर्माचार्याः स्वाशीर्वचांसि निरन्तरं प्रायच्छन् पूज्याः लालकृष्णअडवाणीमहाभागााः रथयात्रामकार्षुः। अष्ट-त्रिंशदधिकैकोनविंशतितमे वर्षे मार्चमासे उत्तरप्रदेशस्य मन्त्रिचरा श्रीमन्त दाऊदयालखन्ना महोदया-अयाचन्त रामजन्मभूमिमविलम्बं हिन्दुभ्यः प्रयच्छन्तु। अस्यां सभायां केन्द्रीयमन्त्रि-गुलजारीलालनन्दाः सरकार्यवाहाः प्रो. राजेन्द्रसिंहा अपि उपस्थिता आसन्। चतुरशीत्यधि-कैकोनविंशतितमे ख्रिष्टाब्दे अप्रेलमास्य सप्तमाष्टमे दिनाङ्के नवदिल्यां प्रथमधर्म-संसदि देशस्य विभिन्न-क्षेत्रेभ्यः समागताः पञ्चशताधिकधर्माचर्याः अयोध्या-मथुराकाशीनगरेषु विद्यमानानां रामजन्मस्थलानां मुक्तये आन्दोलनसंचालनस्य निर्णय-मकार्षुः। साधूनां मार्गदर्शने तस्मिन्नेव समये बजरङ्गदलस्य निर्माणं संजातम्।

अस्मिन्नेवान्तराले षडशीत्यधिकोनविंशतितमे ख्रिष्टाब्दे फरवरीमासस्य प्रथमे दिनाङ्के फैजाबादस्य न्यायाधीशाः श्री के. एस. पाण्डे महोदया ऐतिहासिकं निर्णयं प्रायच्छन् येन पञ्चत्रिंशद्वर्षेभ्यः पिहिता रामजन्मभूमिः समुद्घाटिता जाता।

ऊननवतिवर्षे जनवरीमासे प्रयागकुम्भावसरे सन्तसम्मेलने तृतीयधर्मसंसदि च निर्णयः संजातो यत् प्रत्येकग्रामात् एका शिला प्रत्येकहिन्दूतः सपादैकरूप्यकं नीत्वा मन्दिरनिर्माणकार्यं प्रारब्धव्यम्, ऊननवत्यधि-कैकोनविंशतिख्रिष्टाब्दस्य नवम्बरमासस्य दशमे दिनाङ्के शिलान्यासविधानं कर्तव्यम्। चतुस्त्रिंशदन्यदेशेभ्यः एकादशकोटिजनैः संपूजिताः रामशिलाः अयोध्यायां समागच्छन्। अनेन सम्पूर्णदेशस्य वातावरणं राममयं संजातम्। ऊननवत्यधिकोनविंशतिवर्षे नवम्बरमस्य नवमे दिनाङ्के देवोत्थापिन्येकादशीदिने परमंहस-रामचन्द्रदासाः भगवतो रामस्य जन्मस्थाने भूमेरुत्खननं प्रारभन्त। नवम्बरमासस्य दशमे दिनाङ्के विहारवास्तव्यो हरिजनः कामेश्वरचौपाल प्रथमशिलामस्थापयत्। ततः जिलाधीशः उच्चन्यायालयनिर्णयं यावत् निर्माणकार्य-मवरोद्धमादिशत्। जिलाधीशस्यादेशानुसारं कार्यम-रोधयन् सर्वे स्वस्वस्थामगच्छन्।

ततः 1990 ख्रिष्टाब्दे 14 फरवरीतः कार्यारम्भस्य प्रयागसन्तसम्मेलने निर्णयो जातः परन्तु प्रधानमन्त्रि-विश्वनाथप्रतापसिंहः किञ्चित् समयमयाचत। तेन सह

वार्तालापे कोऽपि निर्णयो नाभवत्। ततः सन्तजनाः प्रबोधिनीएकादशीदिने कारसेवामजूघुषन्। अडवाणी रथयात्रामारभत नवत्यधिकैकोनविंशति तमख्रिष्टाब्दस्य सितम्बरमासस्य पञ्चविंशतिदिनाङ्कतः सोमनाथादारभ्यायोध्यापर्यन्तम्। रथयात्रामार्गे स्थाने स्थाने सभासु विपुलसंख्यायां जनाः समवेताः समभूवन्। बिहारप्रान्ते समस्तीपुरे अडवाणी लालूप्रसादयादव-सरकारद्वारा निगृहीतः। इतः उत्तरप्रदेशे मुख्यमन्त्री मुलायमसिंह-यादवः कथमपि कारसेवा न भविष्यातत्यजूघुषत्। निर्धारिततिथेः सप्तदिनपूर्वमेव लखनऊ-फैजाबादगमन-शीलानि रेलयानानि बसयानानि चावरोधितानि। 2000 विंशतिसहस्त्रं सुरक्षाकर्मिण अयोध्यायाः सर्वेषु प्रवेशद्वारेषु नियोजिताः। अयोध्यायां प्रवेशमवरोद्धुं सप्तवलयिताः सुरक्षाकर्मिणः संस्थापिता अवदच्च अयोध्यायां पक्षी अपि न प्रवेष्टुं शक्नोति।

परन्तु रामभक्ताः कारसेवकाः पद्भ्यामेव गुप्तरूपेण क्षेत्रेषु प्रचलन्तः तडागेषु तरन्तः अयोध्यामागच्छन्। मार्गे पदातीन् कारसेवकान् ग्रामवासिनः भोजनेनातर्पयन् चायपानमकार्षुः मार्गजनितश्रममपनेतुं तैलमर्दनमकार्षुः। द्विचक्रिकयाऽग्रे प्रापयन्। ऊनविंशतिनवम्बरदिनाङ्के सहस्रशः कारसेवका अयोध्यायाः समीपस्थग्रामेषु एकत्रिताः समभूवन्। नवम्बरमासस्य त्रिंशत्तमे दिनाङ्के प्रातः अशोकसिंघलमहन्तनृत्यगोपालदासप्रभृतयः सन्तजनाः जन्मभूमिं प्रति अग्रेसरा अभवन्। यथा यथा सन्तजना अग्रेऽवर्धन्त तथा तेषां पृष्ठे गृहेभ्यो निःसृत्य कारसेवकास्तानन्वगच्छन्। हनुमानगढी प्रापणात् पूर्वमेव लगुडप्रहारेण अशोकसिंहलस्य शिरः भग्नम् रुधिरं प्रावहच्च। किन्तूत्थाय स पुनः रामस्य जयघोष-मकरोत्।

घटनयाऽनया क्रुद्धाः कारसेवकाः सुरक्षावल-यमभिनन्दन्। तस्मिन्नेवान्तराले केचन साधवो हनुमानगढीतो निम्नभागे समागच्छन्। एकः साधुः सुरक्षा-कर्मिणां बसयाने समारुह्य चालकस्थाने समुपाविशत्। समस्तानवरोधान् त्रोटयित्वा बसयानं रामजन्मभूमि-मानयत्। एकः सुरक्षाकर्मी गर्भगृहसम्मुखे पिहितं तालकमुद्घाटयत् शतशः कारसेवकाः रामजन्मभूमि-मन्दिरे प्राविशन् केचन (गुम्बद) शिखरे समारोहन्। तत्र शिखरे भगवाध्वजमारोपयन्। कारसेवा संजाता। सर्वकारस्य सर्वा व्यवस्था स्खलिता जाता।

कार्तिकमासे पूर्णिमादिने कारसेवा पुनः समारब्धा-सरयूतः समागमनमार्गे सहस्रशः कारसेवका अग्रे अवर्धन्त। तस्मिन्नेव समये अयोध्याया भवनानामुपरिभागे नियुक्ताः सुरक्षाकर्मिण आग्नेयशस्त्रैः कारसेवकानमारयन् वीथीषु रक्तं प्रावहत्। शतशः कारसेवका मन्दिरकार्येषु बलिदानिनोऽभूवन्। एतेन चिन्तिताः संचालकाः कारसेवाक्रममवारोधयन्।

सम्प्रति प्रयागस्य उच्चन्यायालयस्य लखनऊपीठस्य त्रयो न्यायाधीशाः वादं शृण्वन्ति। सितम्बरमासस्य दशमे दिनाङ्के दशाधिकविंशतितमे ख्रिष्टाब्दे एते न्यायाधीशा निर्णीतवन्तः यत् विवादितं स्थलं श्रीरामस्य जन्मस्थानं विद्यते। न्यायालयः परिसरस्थभूमेः रामलला सुन्नी-वक्फबोर्ड निर्मोही अखाडासंस्थानेषु (1/3 भाग) समानरूपेण विभाजनमकरोत्। परन्तु न कोऽपि पक्षः तं निर्णयं स्वीचकार। अधुना (सुप्रीमकोर्ट) उच्चतम-न्यायालयः वादं शृणोति। वयम् विश्वसिमो न्यायालयः यत् सत्यं तत् स्वीकरिष्यति।

एष एव समुचितः समयः राममन्दिरनिर्माणस्य। बहुसंख्याकाः मुसलमानाः हिन्दवः साधवः सन्यासिनश्च वाञ्छन्ति सर्वे मिलित्वा सकारात्मकं निर्णयं कुर्युः।

# कोर्पोरेटजातककथा

❑ ऋषिराजजानी

''षड्वादनं जातम् ! साहेब ! गृहं न गन्तुमिच्छति किम् ?'' सहसा पृष्ठतः सेवकः आगत्य अपृच्छत् तदा स अजानात् यत् कार्यालयस्य कालः पूर्णः जातः। यद्यपि महान् कार्यभारः वर्तते, अतः नववादनपर्यन्तं कार्यं कर्तव्यमेव इति सः अजानात्। किन्तु दीर्घकालं यावत् कार्यकालं यावत् कार्यस्य तस्य मनसि चिन्ता नासीत्। स वेलातिक्रमं (overtime) कृत्वा कार्यं कर्तुमभ्यस्तः। युष्माकं मनसि कौतूहलं भवेत् यत् अयं सः कोऽस्ति ? अहम् अस्य वृत्तान्तं कथयामि स स्वीयकार्यालयस्य (Private) एकः सामान्यः कर्मचारी अस्ति। तस्य नाम रमेश, महेश, सुरेश वा दिव्येशः- यत् किमपि भवेत्। यतः स्वीयकार्यालय सेवमानस्य कर्मचारिणः नाम यद् वा भवेत् तद् वा भवेत् किन्तु कार्यं एकविधमेव भवति। कार्यातिरेकः, वेलातिक्रमः, वेतनवृद्धिः (Increment) मासलक्ष्याङ्काः, भविष्यनिधिः (Provident Fund), पदोन्नतिः, अवकाशदिनानां गणना, मासस्य पञ्चतः दशमतारिकासु वेतनप्रतीक्षा, अपि च अन्ते सेवानिवृत्तिः। एतेषु अष्टनवशब्देषु तस्य जीवनं समाप्तं भवति। किन्तु युष्माकं बोधार्थं अहं तस्मै ''सिद्धार्थ'' इति अभिधानं ददामि।

षड्वादनं जातं किन्तु सिद्धार्थस्य मनसि महती चिन्ता आसीत्। अद्य रात्रौ द्वादशवादने ग्रामं गन्तव्यम्। किन्तु अधुनाऽपि श्रीमतः देवोदत्तचट्टोपाध्यायस्य सकाशात् श्वस्तनस्य अवकाशार्थं स्वीकृतिर्न याचिता। श्रीमान् देवोदत्तः सिद्धार्थस्य दुष्टः अहङ्कारयुक्तः, अशिष्टः कर्मचौरः, अलसः, अधिक्षेपकारकः, कार्यविक्षेपकः अधिपुरुषः (अधिकारी) आसीत्। सर्वे कर्मचारिणः तं निन्दन्ति स्म तस्य पृष्ठे। देबोदत्तमहाशयः महाधन-पूजकोऽपि आसीत्। स्वकुटुम्बं कलिकातायां विहाय सः एकाकी अधिकवेतनस्य कृते अत्र निवसति स्म। दिनपर्यन्तं स 'शेयर' क्रय-विक्रयकार्ये व्यस्तो भवति स्म, अपि च सायंकाले सर्वान् प्रदर्शयितुं स कार्यं प्रारभते स्म। सिद्धार्थः अजानात् यद् देबोदत्तात् 'अवकाशस्वीकृतिः' सिंहस्य मुखात् मृगमुक्तिसदृशी वर्तते इति। सिद्धार्थस्य बहवः अवकाशा भगिन्या विवाहोत्सवे, रुग्णमातुः शुश्रूषायां अपि च पुत्रस्य शालाप्रवेशकार्ये समाप्ताः किन्तु अपरेद्युः मातुः शल्यक्रिया आसीत्। गृहे उत्तरदायित्वं बोढुं न कोऽपि समर्थः अपि च शल्यक्रियार्थं धनव्यवस्थाऽपि कर्तव्या आसीत्। अतः गृहगमनं अनिवार्यम्। यद्यपि एकदिवसीयः अवकाशः आवश्यकः केवलं शनिवासर-स्य। अतः पूर्वमेव वेलातिक्रमं कृत्वा सप्ताहस्य सर्वं कार्यं समाप्य स अधिपुरुषस्य कक्षं गतः। (Boss - cabin)

सिद्धार्थो भीतहृदयः अधिपुरुषकक्षस्य द्वारे द्वार-शब्दमकरोत्। कतिपयक्षणेभ्यः पूर्वं कक्षात् देबोदत्तस्य विरावाः अश्रूयन्त। अतः अवकाशस्वीकृतेः पूर्वं देबोदत्तः अवश्यं तर्जयिष्यति इति तस्य मनसि दृढविश्वास आसीत्। सिद्धार्थस्य अन्तः प्रवेशेन सहैव देबोदत्तः अवदत्, 'ओह! अद्यापि भवान् न गतवान्? प्रतिदिनं सर्वे कर्मचौराः षड्वादने गच्छन्त्येव। अस्य कार्यालयस्य बहूनां कर्मचारिणां कर्मणि निष्ठैव नास्ति। भवतु तावत् ! इमां पञ्जिकां गृह्णातु। श्वः प्रातःकाले 'पावरपॉइन्ट' प्रस्तुतिं सज्जीकरोतु। गच्छतु।' सिद्धार्थः तूष्णीमेव स्थित्वा पञ्जिकां अगृह्णात् किन्तु अवकाशार्थं वक्तुं तस्य साहसं नासीत्। देबोदत्तोऽपि पुनः स्वक्रोडसङ्गणके व्यस्तः जातः। किन्तु सिद्धार्थं तत्रैव स्थितं दृष्ट्वा स अवदत्, ''महोदय ! भवान् अत्रैव तिष्ठन् प्रस्तुतिं विधास्यति ? यदि भवान् न गन्तुं शक्नोति तर्हि अहम् उच्चपीठं प्रति

नयानि।'' सिद्धार्थः आतङ्कितो भूत्वा मनसा अवदत्,'मान्यवर ! अहं रात्रौ नववादनात् पूर्वं प्रस्तुतिं विधास्यामि। मम अस्य सप्ताहस्य सर्वं कार्यमपि पूर्णं जातम्। साहेब ! श्वः मम मातुः शल्यक्रिया भविष्यति। अहम् एकदिवसीयम् अवकाशं याचे।' अवकाशस्य नाम श्रुत्वा देबोदत्तचट्टोपाध्यायः क्रुधा रक्तवदनो जातः। स उच्चैः आक्रोशत्, ''ओह ! अधुना ज्ञातम् ! द्विदिवसीयं अवकाशं प्राप्य महोदयः स्वच्छन्दं विहर्तुं वाञ्छति। गत-सप्ताहेऽपि भवता अर्धावकाशः गृहीतः। अहं द्वादश-घण्टापर्यन्तं कार्यं करोमि अपि च सर्वे कर्मचारिणः आनन्दविलासं कुर्वन्ति। अवकाशं न ददामि। रविवासरेऽपि भवता आगन्तव्यम्।''

'साहेब ! अहं सत्यं वदामि। मम गमनम् अनिवार्यम्। अहं सोमवासरे आगत्य सर्वमपि कार्यजातं पूर्णं करिष्यामि। सिद्धार्थः अवदत्। देबोदत्तः सोपालम्भं अवदत्' ''अपि भवान् कदापि कार्यचिन्तां करोति वा ? पश्यतु एतानि सर्वाणि वैद्युतपत्राणां (e-mail) उत्तराणि दातव्यानि। मासान्तं यावत् अयं प्रकल्पः (project) पूर्णतां नेतव्यः। यदि प्रकल्पः अपूर्णः भवेत् तदा मम पदोन्नतिः स्थगिता भविष्यति। अस्माकं निदेशकः मह्यं वेतनवृद्धिमपि न दास्यति।'' इत्थं वदन् प्रलपन् आक्रोशन् देबोदत्तः पञ्चिकाः अवालोकयत्। सः प्रस्वेदक्लिन्नः जातः। तस्य शरीरमपि वेपते स्म। सः उच्चैः अवदत्, यदि मम पदोन्नतिः न भविष्यति तदा यूयं सर्वेऽपि परिणामं भोक्ष्यथ। अवकाशः नास्ति। बहुकार्यं वर्तते। सत्वरं-सत्वरं कुरु। इत्युक्त्वा स स्ववक्षसि हस्तं निधाय उच्चैः चीत्कारमकरोत्। तस्य नेत्रयोः तिमिरं प्रासरत्। स आसनात् भूमौ निपतितः।

सोमवासरे प्रातःकाले देबोदत्तः चिकित्सालयस्य तत्कालचिकित्सा 'आइ.सी.यु.' कक्षे पर्यङ्के स्वनेत्रे उदघाटयत्। तस्य पुरतः सिद्धार्थः च अन्ये कर्मचारिणश्च स्थिताः। सिद्धार्थः अपृच्छत्, ''श्रीमन् ! अपि स्वास्थ्यं समीचीनं वर्तते?'' श्रीमान् देबोदत्तः शनैः शनैः साश्चर्यमवदत् ''अहमत्र कथम् आगतः ? अहं न स्मरामि किञ्चित्।'' एकः कर्मचारी संक्षेपेण सर्ववृत्तान्तं न्यवेदयत् यद् देबोदत्तः सहसा हृदयरोगाक्रमणवशात् न्यपतत्। सिद्धार्थः रुग्णवाहनेन तं रुग्णालयमनयत्। चिकित्सालये शीघ्रमेव शल्यक्रिया अनिवार्या आसीदतः स धनव्यवस्थामपि कृतवान्। देबोदत्तस्य कलिकाता-स्थितां पत्नीमपि स सर्ववृत्तान्तं दूरभाषेण अकथयत्। देबोदत्तस्य कुटुम्बिनः अत्र आगन्तुं प्रस्थिताः किन्तु दीर्घयात्रावशात् अधुना ते न आगताः द्विदिवसपर्यन्तं सिद्धार्थ एव तस्य शुश्रूषायां रात्रिन्दिवं तत्रैव स्थितः। श्रीमान् देबोदत्तः तूष्णीं भूत्वा सर्वमशृणोत्। कतिपयक्षणान्तरं स अपृच्छत्, ''सिद्धार्थ ! भवतः मातुः शल्यक्रिया जाता न वा ? भवान् न तत्र गतवान्?'' सिद्धार्थः अवदत्, 'मम मातुः शल्यक्रिया सुचारुरूपेण सम्पन्ना। मम पत्नी सर्वं दायित्वं एकाकिनी निरवाहयत्। अहं भवन्तं निःसाहाय्यं विहाय कथं गच्छेयम्?'

देबोदत्तः किञ्चिदपि वक्तुं नाशक्नोत्। किन्तु तस्य नेत्रयोःअश्रुमन्दाकिनी तस्य मनः पवित्रमकरोत्। तस्यां अमावस्यायां सिद्धार्थस्य मुखे वैशाखीपूर्णिमायाः ज्योत्स्ना प्रासरत्।

युष्माकं मनसि प्रश्नः स्यात् यद् अहम् इमां कथां कथं जानामीति। चीनदेशस्य प्रवासकाले कस्मिन्नपि अश्वत्थ-वृक्षतले उपविष्टः कोऽपि श्वेतवस्त्रो बोधिसत्वः मां कथामिमाम् अकथयत्। स संन्यासी मन्दस्मितेन सह अवदत्, 'वत्स ! त्वया या कथा श्रुता, सा तवैव पूर्वजन्मनः कथा वर्तते' इति।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

स्मृतिकथा

❑ डॉ. हर्षदेव माधवः

# पञ्चरूप्यकाणि

'गच्छ, कुबेरपितृव्यात् पञ्चरूप्यकाणि आनय।' सायंकाले ज्येष्ठभ्राता मां पुनरपि कुबेरपितृव्यगृहं गन्तुमवदत्।

अहं दशवर्षीयो बालः। व्यवहारानभिज्ञः किन्तु अकथयम्, 'भ्रातः! कुबेरपितृव्यः असाधुर्वर्तते। स नैव दास्यति। प्रातःकाले मया तस्य मुखाकृतिं दृष्ट्वा तस्य मनो वाचितम्। स धनं दातुं न कामयते।' इति।

ज्येष्ठभ्राता अवदत्,'त्वं न गन्तुकामः। अत एव मिषेण निषेधं करोषि। एकवारं गत्वा पुनरपि पञ्चरूप्यकाणि दातुं प्रार्थय। वयं शीघ्रमेव तस्मै दास्यामः। ऋणग्रहणं कृत्वा शीघ्रमेव धनं दातव्यम्। तेन दिनपर्यन्तं व्यवसायं कृत्वा निश्चितमेव धनं प्राप्तं स्यात्।'

कुबेरः नाम्ना एव कुबेर आसीत्। स तक्षकः आसीत्। गृह एव स व्यवसायं करोति स्म। तस्य गृहे इतस्ततः सर्वत्र काष्ठखण्डाः, कीलकाः, मुद्गरः, क्रकचः- इत्यादीनि साधनानि शोभन्ते स्म। कटिवस्त्रं मात्रं धृत्वा स गृहे उपाविशत्। तस्य समग्रे शरीरे रक्त-श्वेत-श्यामलिताः वर्तन्ते स्म, क्रूरदृष्टिं न्यक्षिपत्। मह्यं स न रोचते स्म। तस्य रक्तनेत्रे तस्य मद्यपत्वमसूचयताम्। तस्य हस्ततले कर्कशे, मुखे श्मश्रुः वलीयुक्तं मुखं, धूमपानधूसरौ ओष्ठौ, पक्षिकुलायसदृशः केशराशिः, मुद्गरप्रहारकर्कशाः अङ्गुल्यः, असभ्या वाणी-एतत् सर्वं तस्य व्यक्तित्व-परिचायकमासीत्। किन्तु अधमर्णाय गर्दभोऽपि पितृव्यः प्रतिभाति इति न्यायेन ज्येष्ठभ्राता धनाशया मां पुनरपि प्राहिणोत्। अहं कुबेरस्य गृहं गतवान्। स दारुखण्डेभ्यः किञ्चिद् वस्तुनिर्माणं करोति स्म। अहं गत्वा तस्य सम्मुखो भूत्वा स्थितः। स मां दृष्ट्वाऽपि न दृष्टमिव कार्यं करोति स्म।

''कुबेरपितृव्य! मम ज्येष्ठभ्राता पञ्चरूप्यकाणि याचते। स सप्ताहोत्तरं तुभ्यं दास्यति।'' कुबेरो रूक्षस्वरेण अवदत्, 'रूप्यकाणि न सन्ति।' पुनरपि स क्रकचेन दारु व्यदारयत्। 'कदा भवान् दास्यति?' अहं पुनरपि पृष्टान्। 'श्वो मध्याह्ने आगच्छ।' स अवदत्।

अपरेद्युः पुनरपि मध्याह्ने अहं गतवान्। स तथैव कार्ये व्यापृत आसीत्। मां दृष्ट्वा अहं किञ्चिदपि वदेयं तत्पूर्वमेव स अवदत्, 'सायंकाले आगच्छ। अधुना न सन्ति रूप्यकाणि।' अहं प्रतिनिवृत्य तस्योत्तरं न्यवेदयम्।

पुनरपि सायंकाले मम भ्राता मां कुबेरदासस्य गृहं गन्तुमादिशत्। अहं सक्रोधमवदम्,'स दुष्टोऽस्ति। स केवलं वचनानि ददाति। स धनं नैव दास्यति। भवान् गच्छतु।' मम जयेष्ठभ्रातुर्मुखं दृष्ट्वा अहं पुनरपि तस्य गृहं गतवान्। स धूमपानं करोति स्म। मां दृष्ट्वा सोऽवद्, 'श्वःआगन्तव्यम्। अधुना मम समीपे पञ्चरूप्यकाणि न सन्ति।' 'किन्तु भवता प्रातःकाले वचनं दत्तम्। अधुना ददातु।' स सोपालम्भ-मवदत्, 'श्वः आगन्तव्यम्। अधुना मम समीपे पञ्च रूप्यकाणि न सन्ति।'

अहं सक्रोधमवदम्, 'यदि भवान् रूप्यकाणि दातुं नेच्छति तर्हि स्पष्टं वदतु।' एतत् तु तव भ्रात्रा अवगन्तव्यम्। तव भ्राता न कमपि व्यवसायं करोति। स मम पञ्चरूप्यकाणि कथं दास्यति। अत एव अहं न ददामि। ऋणं दत्त्वा अहं शत्रुर्भवितुं नेच्छामि। एवं प्रकारेण यदि सर्वेभ्यो धनं दत्त्वा अहं स्वयमेव दरिद्रो भवेयम्। यदि गृहे किञ्चिदाभूषणं भवेत्, तदानय। इति।

अहं विलक्षो भूत्वा गृहं गतवान्। मनसि कुबेराय गालीशतं वदन् सर्वमपि भ्रात्रे न्यवेदयम्। दुष्टकुबेरदासो धनं दातुं नैच्छत्, तथापि स वचनानि ददाति स्म।

वस्तुतः कुबेरस्य निर्घृणता मम भ्रात्रा न ज्ञाता। दरिद्रता हि सर्वापमानानां मूलमस्ति। दारिद्र्यमेव पुरुषस्य पौरूषं हरति, तं याचकं दीनं हीनं सत्त्वहीनं करोति।

अधुनापि कदाचित् पञ्चरूप्यकाणि वीक्ष्य अहं ममा-तीतं स्मरामि। कृपणस्य कुबेरस्य मुखमपि स्मरामि। तस्य क्रूरवचनानि मम कर्णयोः गुञ्जन्ति। ईश्वरं प्रार्थयामि यत् स कमपि जनं याचकं न कुर्यादिति।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

# सा कन्यका मौक्तिकहारतुल्या

❑ आचार्य डॉ. राजेशकुमारगुप्तः

गर्भस्थकन्या करुणार्द्रभावा
वात्सल्यकामा भवज्ञानशून्या।
क्रूरैर्नरैर्दुष्टतयाऽत्र लोके
निहन्यते यैरघचारिणस्ते।। 1।।

कन्या पवित्रा कुलतारिणी या
सत्कर्मशीला मधुरा वचोभिः।
भागीरथीवद् हृदयेन शुद्धा
सा पूजनीया च सुरक्षणीया।। 2।।

साहित्यक्षेत्रे कविकर्मकर्त्री,
वाद्ये च नृत्ये निपुणा सुगीते।
या शास्त्रधर्मे च नये विशिष्टा
सा कन्यका मौक्तिकहारतुल्या।। 3।।

दुर्गास्वरूपा शुभदा मनोज्ञा,
सौम्या सुधासिक्तमुखारविन्दा।
पित्रोर्मनोरञ्जनतत्परा या,
कन्या सदा सा सुखदा भवानी।। 4।।

मन्दाकिनीवत् सदने वहन्ती
मनो जनानां खलु पावयित्री।
नक्षत्रदोषाद् ग्रहजन्यकष्टात्
पापात् नरं तारयतीह कन्या।। 5।।

यस्मिन् गृहे पूजनमर्चनं स्याद्
मानः शिवावद् मृदुकन्यकानाम्।
विष्णुप्रिया श्रीर्धनवैभवानि,
तस्मिन् गृहे वर्षति नित्यमेव।। 6।।

कन्याः कुदृष्ट्याऽपि विलोकयन्ति,
निध्नन्ति वा ता बलपूर्वकं ये।
ते स्वार्थिनः सर्वसुखाद् विहीनाः
दुःखं लभन्ते पतनोन्मुखास्ते।। 7।।

सुता गुणानां सुतवत् खनिर्या
पित्रोर्यशो भानुसमं तनोति।
कुलं समाजं निखिलं च राष्ट्रं,
धन्यं सुकृत्यैः शुभदैः करोति।। 8।।

कन्यासुतां प्राप्य सुखान्वितौ यौ
तां रक्षितुं पालयितुं यतेते।
शिक्षाप्रदाने कृपणौ न तस्याः
तौ कन्यकायाः पितरौ हि धन्यौ।। 9।।

सुता सुराज्ये सुधियां समाजे,
सम्मान्यते शक्तिशिवस्वरूपा।
शीलेन संस्कारयुतैः सुवृत्तैः
सुशोभते सा सफला सुयोग्या।। 10।।

संस्कृत-विभागः
केन्द्रीय-विद्यालयः क्र. 2, सैन्यक्षेत्रम्, जयपुरम्

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# गीताविवेचनम्

भरतीयदर्शनप्रस्थानानामाधारभूतो ग्रन्थसमुच्चयः ''प्रस्थानत्रयी'' त्यभिधीयते यस्मिन् उपनिषदो, भगवद्गीता, ब्रह्मसूत्रं चेति त्रयं परिगण्यते इति सुविदितमेव। प्रस्थानत्रय्या भाष्यप्रणयनेनैव कश्चिदप्याचार्यः स्वकीयं पृथग्दर्शनसम्प्रदायं प्रवर्तयितुमर्हः स्यादित्याभाणकमपि सुविदितं यद्यप्येतस्य प्रामाणिकत्वं वास्तविकत्वं च न परिदृश्यते यतोहि प्रमुखैर्मूलाचार्यैः सर्वैरेव प्रस्थानत्रय्या भाष्याणि लिखितानि स्युरिति नास्ति वस्तुस्थितिः। केवलं शङ्कराचार्येण, मध्वाचार्येण च प्रस्थानत्रयीभाष्याणि व्यलेख्यन्त, अन्येषामाचार्याणां परम्परायां परवर्तिभिराचार्यैरवश्यं प्रस्थानत्रयीभाष्यप्रणयनपूरणमनुष्ठितं, न तु स्वयं रामानुजाचार्येण, वल्लभाचार्येण, निम्बार्काचार्येण वा। केनचन गीताभाष्यं व्यलेखि, उपनिषदां वा। ब्रह्मसूत्रस्य भाष्यमवश्यं सर्वैरेवाचार्यै र्व्यलेखि।

श्रीवल्लभाचार्याणां पुष्टिमार्गाख्ये सम्प्रदाये गीताभाष्यं स्वयं महाप्रभुणा वल्लभाचार्येण नाऽभूल्लिखितं, परवर्तिना वल्लभनाम्नाऽऽचार्येणैकेन व्यलेखीति श्रुतमस्माभिः। पुष्टिमार्गीयमान्यतानुसारं गीतायाः प्रत्येकमध्यायानां प्रतिपाद्यविषयस्य शास्त्रीयं श्लोकबद्धं निबन्धनमाधुनिककालीनैः सर्वशास्त्रविशारदैर्वल्लभवंशजैर्मुम्बई-निवासिभिः सुप्रस्थितैर्विद्वन्मूर्धन्यैः श्री श्याममनोहराचार्यैर्गोस्वामिवर्यैः कृतमस्तीति ज्ञात्वा प्रमोदेरन् सुधियः। पद्यबद्धमिदं संक्षिप्तं गीताभाष्यं प्रकाशमप्यायातमस्ति। ''श्रीमद्भगवद्गीताऽध्यायप्रतिपाद्यसंक्षेप'' शीर्षकस्यास्य ग्रन्थस्य गीतानुसारमष्टादशैवाध्यायाः सन्ति। प्रत्येकमध्याये गीताया एकैकस्याध्यायस्य सारविवेचनमनुष्टुप्सु कृत्वा कथं सर्वस्यास्य ग्रन्थस्य प्रतिपाद्या भक्तिरेव,कथं वल्लभाचार्याणां मान्यता तदनुसारं संगच्छते इत्यादि स्पष्टीकृतमाचार्येण। ''योग'' स्याप्यर्थः श्रीकृष्णेनाराध्येन सह संयोग इत्येवाऽस्ति, सैव पुष्टिः, सैव भक्तिरित्याद्यनेन सङ्गच्छेत इति भाष्यकाराणां हार्दं स्पष्टीभवति।

ग्रन्थोऽयं पद्यबद्धः संस्कृतेऽस्ति, प्रारम्भे हिन्द्यां सम्पादकीयमस्ति, काशीहिन्दूविश्वविद्यालयीय-दर्शन-धर्मविभागाचार्यस्य सच्चिदानन्दमिश्रस्य हिन्द्यां पुरोवागपि मुद्रिता।

गीतायाः पुष्टिमार्गानुसारि तदिदं विवेचनमध्येतव्यं स्यात् सर्वैः सुधीभिर्जिज्ञासुभिश्चेति महत्त्वमस्य ग्रन्थस्य स्फुटमेव।

**श्रीमद्भगवद्गीताध्याय-प्रतिपाद्यसंक्षेपः- ले. गोस्वामी श्याममनोहराचार्यः प्रका. आचार्यवर्याः स्वयम् 63, स्वस्तिक सोसाइटी, जुहू चौथा रास्ता, विले पार्ले मुंबई 56, पृ.सं. 112, मू. निःशुल्क-वितरणार्थम्।**

## जीवनवृत्तं प्रशस्तिकथात्मकम्

जानीयुरेव संस्कृतकाव्येतिहासमर्मज्ञा विद्वांसो यन्न-वशताब्दीपूर्वं हेमचन्द्राचार्यवर्यैः ''कुमारपालचरिता-'' ख्यमुत्कृष्टं काव्यरत्नमसृज्यत यत्र राजाधिराजस्य कुमारपालस्य चरित्रमुत्कीर्णमासीत्। स हि कुमारपालः शिवभक्तोऽप्यासीत्। गुर्जरभूमिस्थस्य सोमनाथमन्दिरस्य जीर्णोद्धारस्तेन कृतोऽभूत्, तदनु स जैनशासनानुयायी समभूत्। उत्कृष्टं तस्य चरित्रं वर्णितं काव्ये तस्मिन्। आधुनिके युगेऽपि कुमारपालनाम्ना एवैकस्य जिनशासन-हितकारिणः समाजसेवकस्य यशस्विनो महतः पुरुषस्य जीवनं जैनमुनिवर्यैः प्रणीतमस्ति, सद्य एव प्रकाशितमिति ज्ञात्वा सविस्मयः प्रसादोऽनुभविष्यते संस्कृतसुधीभिः।

गुर्जरभूमेरलङ्करणं जिनशासनसेवी राष्ट्रसेवी च कुमारपाल वी. शाहनायकोऽयं सज्जनो भारते राष्ट्रहितस्य जिनशासनसेवायाश्चानेकानि कार्याणि समपीपदत्। तस्य

प्रशंसायां विजयरत्नसूरीश्वरैर्गुर्जरभाषायां द्वे प्रशंसाग्रन्थे विरचितेऽभूताम्- ''कलियुगनी कमाल: कुमारपाल वी. शाह'' ''आ अतिहास नथी, वर्तमान छे'' इति नामभ्याम्। तावादाय संस्कृते कुमारपालप्रशस्ते-रवतारणा कृताऽस्ति रत्नसुन्दरसूरीश्वरैः। स एव ग्रन्थः ''कुमारपालकथा'' शीर्षकेण सपद्येव गुर्जरदेशात् प्रकाशितो यः संस्कृतसाहित्यभाण्डागारं पोषयतीति प्रमोदावहम्।

दानिवर्यस्य कुमारपालस्य देशहितकारिणां, जैनधर्महितकारिणां च कार्याणां कथा 27 प्रसङ्गेषु कुमारपालप्रसङ्गकथानाम्ना प्रथमं सप्ततिपृष्ठेषु संस्कृतगद्ये सरलया कथाशैल्या निबद्धा, तदनु ''कुमारपाल-गुणकथा'' नाम्ना महापुरुषैः सह कुमारपालस्य चित्राणि प्रदर्श्य संस्कृतगद्ये तद् विवरणं प्रस्तुतमस्ति। अत्र हि सर्वत्र कुमारपालं सम्बोध्य प्रशस्तिरुत्कीर्णाऽस्ति। राजस्थाने भरतपुरे यदा नाऽभूदेकमपि जिनाऽलयम्, कुमारपालप्रयासैरद्यानेकानि तत्र सन्ति, समस्तेऽपि देशे बांग्लादेशयुद्धादिघटनाऽवसरेषु कथं कुमारपालेन दानकार्याणि, हितकार्यणि चाऽन्वष्ठीयन्तेत्यादि सरलसंस्कृतेनोपनिबद्धं द्रक्ष्यते पाठकैः। कथा सेयं संस्कृतपाठकेभ्यो रोचिष्यत इत्याशास्महे।

लेखनानन्तरं संस्कृतकथा सेयं मुनिद्वयेन संशोधिता-ऽप्यासीदित्यङ्कितमत्र। अतो व्याकरणस्खलनानि प्रायो न दृश्येरन्। द्वित्रस्थानेषु तादृशानि स्युरपि चेदग्रागामिषु संस्करणेषु निराकरिष्यन्त इत्याशास्यते। गुर्जरभूमितः संस्कृतग्रन्थाः संस्कृतपत्रपत्रिकाश्च यथा प्रभूतमात्रायां प्रकाश्यमानाः सन्ति तत्सूचना भारत्यां सप्रशंसं सर्वदा प्रस्तूयत एव। सोऽयं ग्रन्थोऽपि तथैव स्वागतार्हः।

**कुमारपालकथा ले. रत्नसुन्दरसूरीश्वरः प्रका. श्रीरत्नमयी ट्रस्ट कल्पेश वी.शाह 14 ईलोरा पार्क, नारणपुरा अहमदाबाद 13 प्राप्तिस्थानम् अपूर्व शाह 24 पंकज सोसाइटी, भट्टा, पालडी अहमदाबाद 7, पृ. 108 मू. नाऽङ्कितम्।**

**आधुनिककाव्यपृषता:**

# वस्तुसेवाकरः ( G.S.T. )

❑ **डॉ. हर्षदेव माधवः**

वयं खादामश्चत्वारः सुहृदो भोजनगृहे
पञ्चमो न खादति, नैव पिबति किन्तु
केवलं लुण्ठति धनं भोजनशुल्केन
वयं गच्छामस्त्रयः सिनेमागृहम्,
चतुर्थश्चलचित्रं न पश्यति, न शृणोति तथापि
गृह्णाति चिटिकाभिः स्वभागम्।
आवां क्रीणीवो विपणौ तदा
तृतीयो न क्रीणाति न विक्रीणाति किन्तु सिंहो भूत्वा
स आक्रमणं करोति, छिनत्ति धनम्।
अहं गच्छामि ग्रामान्तरं।
द्वितीयो न गच्छति नागच्छति वा स स्थित्वापि
मम वस्त्रकोषाद् धनं हर्तुं शक्तः पश्यतोहरः।
मम प्रतिक्रियं धनहरणलीलासूत्रधारस्य
तस्य कृत एव भवन्ति सर्वे व्यापारा मे।
मम पितुर्वयं त्रयः पुत्राः
किन्तु सर्वकारनाम्न्या अपरमातुः पुत्रकौ
आयकर-वस्तुसेवाकरौ
(पीनौ देवदत्तौ दिवाऽति भुञ्जाते, रात्रावपि भुञ्जाते।)
सदैव अर्जन-व्ययकाले दायादौ भूत्वा
निस्त्रपौ हरतः सर्वक्रियानन्दम्।।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

चतुस्त्रिंशः प्रसङ्गः

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

# एकनिष्ठाः कार्यकर्त्तारः

❑ वेणीमाधव गो. धर्माधिकारी

तत्कालीनाः सहसर्वकार्यवाहकाः माधवरावमुले महोदयाः वर्णयन्ति- अहं यदा नागपुरे सप्तमकक्षायाश्छात्र आसम् तदैव बाबामहोदयानां सम्पर्के आगतः। ईसवीये 1925 तमे वर्षे राष्ट्रीयस्वयंसेवकसंघस्य स्थापनानन्तरं संघकार्यं कर्त्तुं ये युवकाः द्राक्तरमहोदयैः सह कायार्थमग्रे समागताः तेषु बाबामहोदया अप्यासन्। एवञ्च 1927 तः 1932 पर्यन्तं वर्षचतुष्टये बाबामहोदयानां सान्निध्यं प्राप्तम्। तेषु दिवसेषु ते संघस्य लघुतमे कार्यालये एव वसन्तिस्म। ते दिवसास्तादृशा यदा देशे क्रान्तिकारिणां कार्यकलापास्तीव्रतराः आसन्। भारतादांग्लानां राज्यसत्तामुत्पाटयितुं प्रत्यक्षमान्दोलनानि, गुप्ताश्च सशस्त्राः क्रियाकलापाः उभयोरावेग आसीत्। वयं विद्यार्थिनोऽप्येतैः प्रभाविताः आस्म। राष्ट्रीयस्वयंसेवक-संघस्य संगठने देशभक्तेः प्रबलमावेगं राष्ट्रनिर्माणार्थञ्च शाखापद्धत्या संघस्य प्रमादशून्यां संगठनकुशलता-मवलोक्य वयं संघं प्रत्याकृष्टाः। कार्यालये गमनम-प्यारब्धम्। बाबामहोदयैः प्रेरणा सम्प्राप्ता। अहमद्यापि सुप्रकारेण स्मरामि यत्तेषु दिवसेषु कियत्या प्रभावपूरितया गत्या वीरसावरकरस्य गोमान्तककाव्यं श्रावयन्ति स्म। ओजस्विप्रकारेण, आन्तरिकया तन्मयतया, हृदयस्प-र्शिन्या भावभङ्गिमया च यदा ते तासां काव्यपङ्क्तीनां पाठं कुर्वन्तिस्म तदा वयं सर्वे युवकाः तैः सह एकरसाः अभूम। एतदतिरिक्तं क्रान्तिकारिणां जीवनचरित्र-श्रवणस्याप्यवसरोऽस्मभ्यं संप्राप्तः। तस्मिन् समये वयमाश्चर्यान्विताः यत् सर्वासां घटनानां संस्मरणे कीदृशी विलक्षणशक्तिस्तेष्वासीत्। अस्मासु किशोरावस्थायामेव तेषां तेजस्वितरुणजीवनस्य महान् प्रभाव आसीत्। तेभ्य एवेयं प्रेरणा सम्प्राप्ता यामाश्रित्य वयं संघकार्ये अग्रे अग्रे वर्द्धमानाः संजाताः।

तेषां स्नेहपूर्णस्य मार्गदर्शनस्य पूर्णो लाभः मया तदापि प्राप्तः यदाहं पंजाबप्रान्ते प्रथमवारं संघकार्यं कर्त्तुमागतः। परमपूजनीयानां द्राक्तरमहाभागानां स्वर्गवासः 1940 वर्षे जूनमासस्यैकविंशततिमे दिने समभवत्। तस्मिन्नेव वर्षे जुलाईमासेऽहं संघकार्यं कर्त्तुं लाहोरनगरे (जयपुरे) सम्प्राप्तः। एकमासानन्तरमेव बाबा महोदयाः अपि लवपुरे समागताः। ते परमपूजनीयानां गुरूणां गोलवलकराणा मादेशात्पंजाबप्रान्त प्रचारकत्वेन नियोजनादेशं गृहीत्वा समागताः। ते मया सह स्यालकोटे, रावलपिंड्याम्, अमृतसरसि, लायलपुरे, मुल्ताननगरे, जम्मूनगरे, अन्येष्वपि कतिपयस्थानेषु गताः। स्थाने स्थाने च संघशाखानां कार्यकर्त्तृभिः, हिन्दुत्वनिष्ठैः व्यक्तिभिश्च मे परिचयोऽपि कारितः।

श्रीमन्तो बाबामहोदयाः 1935-36 वर्षत एव पञ्चनदप्रान्ते गमनागमनं कुर्वन्तिस्म। प्रथमवारं ते 1935 तमे वर्षे द्राक्तरमहोदयानां पत्रमादाय स्व. बन्धु-परमानन्दमहोदयानां समीपे समागताः लवपुरे। समस्तं भारतं परमानन्दमहोदयान् जानातिस्म। पञ्चनदे तु बालाः शिशवोऽपि तेषामादेशं पालयन्तिस्म। बन्धूनां परमानन्दमहोदयानां परिचयात्मकं पत्रमादाय ते पञ्चनदप्रान्ते प्रमुखस्थानेषु भ्रमणमकुर्वन्। तेषु दिनेषु कस्मिन्नपि नूतने स्थाने संघकार्यप्रारम्भस्य प्रमुखं साधनं नागपुरे जायमाने ग्रीष्मकालीने संघशिक्षावर्गे तरुणानामानयनमेवासीत्। प्रथमवर्षे तु तेभ्यः साफल्यं न प्राप्तम्। परं बाबासदृशानामग्रे असफलतायाः स्थितिः स्थातुमसंभवैव। अग्रिमे वर्षे चत्वारस्तरुणाः नागपुरे संघशिक्षावर्गे समागताः। ते लवपुरादेवागताः। 1939 वर्षे एव देहल्यां संघकार्यस्य बीजारोपणमभूत्। श्रीमन्तो वसन्तराव ओकमहोदयाः छात्ररूपेण देहल्यां समागताः। ते देहल्यां हिन्दु महासभा-भवने स्थिताः। अस्मिन् समयेऽपि बाबामहोदयाः देहल्यामागत्य स्थिताः। तस्मिन्

समये यदा संघस्य विषये कोऽपि किञ्चिदपि न जानातिस्म, संघकार्यार्थं कर्मठानां त्यागिनां जनानां निर्माणं तेषामन्वेषणं च न सरलं कार्यम्। परं बाबामहोदयैः स्वस्यादम्ययेच्छाशक्त्या कर्मठताया बलमाश्रित्य पंचनदादिस्थानवदेव देहल्यामपि संघकार्यस्य बीजारोपणं कृतमेव।

ततस्तु वर्षद्वयान्तराले एव द्रुतगत्या सर्वत्र संघकार्यस्य मूलं संव्याप्तम्। 1938 वर्षे च लवपुरे एव प्रथमः संघशिक्षावर्गः समायोजितः। नागपुरतः श्रीमन्तो राजाभाऊपातुरकर महोदया अप्येतेषु दिवसेषु लवपुरे समागताः। एवं च यदाहं 1940 वर्षे संघकार्यार्थं पञ्चनदप्रान्ते समागतस्तावत् बाबामहोदयानामनवरत-प्रयत्नेनात्र प्रारम्भिकमाधारनिर्माणं तु जातमेवासीत्।

क्रमशः ...............

ब्रह्मपुरी, जयपुरम्

---

**प्रेरकप्रसङ्गशतकम्** — **षष्टितमः प्रसङ्गः**

# सैनिकः पुत्रः

❑ **श्रीमती आराधना धर्माधिकारी**

बाल्ये मातृपित्रोर्भर्त्सनं तयोराशीर्वादान्न न्यूनम्। अहमेकस्मिन् लघुग्रामे वसन्नासम्। तत्र प्रत्येकस्मिन् गृहे भर्त्सनप्रभर्त्सनयोर्विपुलः प्रसार आसीत्। वर्तमाने तद् भर्त्सनप्रभर्त्सनमतिकटु भवतिस्म परं यदि भविष्यं प्रति चिन्त्यते चेत्तदाशीर्वाद एव। अहं गृहे पूर्णपरिवारजनानां समाजस्य च भर्त्सनं विषह्य धृष्टः संजातः। एतस्य भर्त्सनकार्यस्योत्पादनं पितृचरणैरेव कृतं मन्यते स्म। यदा कदा तु भर्त्सनप्रभर्त्स्नानां प्रयोगिकं तेषां हस्ताभ्यामपि प्राप्नोतिस्म। एतेन क्रोधस्तु भवतिस्म परं चेतः सान्त्वयन्नासम्। चेतसाप्यामिरखानस्य चलचित्रवत् आल इज़् वेल (सर्वें सुन्दरम्) इति विश्वसितमासीत्। व्यतीतेभ्यः कतिपयवर्षेभ्योऽद्यावधि जीवनयात्रायां भर्त्सनप्रभर्त्सनयोरिति वृत्तस्य व्यापकं रूपं दृश्यते स्म।

अहमद्यातिशीघ्रमेवोत्थापितः। कदाचिद् भर्त्सन-प्रभत्सनयोः काचिन्न्यूनतावशिष्टा स्यात्। पितृचरणाः तमालपत्रवाष्पं पातुं दाहयन् किञ्चिदुपदेक्ष्यन्तीति चिन्तयन्नासम्। सहैव ग्रामस्य तुलनां नगरेण कुर्वन्नासम्। तदैव समाचारपत्रवितरकः समायातः। समाचारपत्रं प्रक्षिप्य गच्छन्नेवासीत्। पितृचरणैराहूतः-किं रे ! अद्य इयता विलम्बेन कथम्? श्रुतमश्रुतमिव कुर्वन् समाचारपत्रवितरको गतः। भूयश्च पितृचरणाः अवदन्-एष एकाकी वराकः किं किं करिष्यति। एकश्च त्वमसि यः समयस्य मूल्यमेव न जानासि। मां स्पष्टमेव दृश्यते स्म यन्नरेन्द्र-मोदीमहोदयं प्रति संकेतः। तेषां कथनमासीद् यदन्तत एक एव जनः यो हि देशं समुद्धर्त्तुं गौरवान्वितं च कर्तुं सर्वतोभावेन संलग्नः। मां समाचारपत्रं पठितुं भर्त्सना प्राप्तव्यैवासीत् तदैव मया त्वरितं समाचारपत्रं हस्ते गृहीतम्। तदैव च मे दृष्टिः अन्तिमपृष्ठे गता तस्मिन् सैन्यकार्यालये लेखकपदार्थं जाताया: परीक्षाया: परिणाम आसीत्। तस्यां सूच्यां स्वाङ्कमन्वेष्टुं प्रयत्नः कृतः, अन्ते च सम्प्राप्तः। तेषां समीपे गत्वा तत्पत्रं ददता सस्मितेन मया निवेदितम्-पितः मे चयनमभूत्। पितृचरणैः कथितम्-कस्मिन् अहं सेनायां लेखकः संजातः पितृचरणाः अवदन्-वाह! अवलोकय मनीषायाः जननि! लवपुत्रः सैनिकः संजातः। मात्रापि सहर्षं मे मस्तकचुम्बनं कृतम्। पितृचरणैरपि हस्तौ प्रसारितौ, यौ कण्ठग्राहं मिलितुं निमन्त्रणमासीत्। अवसरं प्राप्याहमपि कण्ठग्राहं मिलितः। अद्य पितुर्भर्त्सनया मम जीवने महत्-परिवर्त्तनमभूत्। भविष्यस्य सुरक्षा संजाता। यानहं क्लिष्टतमान् दिवसान् व्यत्यापयम् तैरेवाहं सुखस्य मार्गं प्राप्तवान्।

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्

# पण्डितमधुसूदन ओझा-विरचितज्योतिषचक्रम् इति ग्रन्थस्य भूगतिविचारः

❑ अञ्जना शर्मा

पुराणवाङ्मये सर्गप्रतिसर्गयोर्महत्वं भौगोलिक-दृष्ट्या स्वीक्रियते। इतिहासपुराणाभ्यां वेदं समुप-बृंहयेदि दिशा वेदोपबृंहणरूपं लक्ष्यमुद्दिश्य पुराणकारः पुराणेषु सर्वप्रथमं सर्गं निरूपयति। सर्गादेवेति-हासादेरारम्भात् वेदादेः प्रयोजनसिद्धत्वाच्च। पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतमिति यदुक्तं तेनापि पुराणानामादित्वात् सर्गवाक्यादित्वात् सर्गनिरूपणं पुराणेषु सर्वाधिक्यं प्रामाण्यं भजते। लौकिकशास्त्रत्वात्-पुराणेषु ययोः सर्गप्रतिसर्गयोः निरूपणं विद्यते तद् वस्तुतः लोकसंदर्भितमेवास्ति। यद्यप्यनेकत्रानेकेऽप्य-लौकिकविषयाः पुराणेषु निरुपितास्तथापि सर्गप्रति-सर्गयोः लोकसंबद्धत्वात् लौकिकं भूगोलमेवात्र सर्गप्रतिसर्गवर्णनस्याधारभूतम्।

सर्गप्रतिसर्गयोर्यः सर्गः स सृष्टिनाम्नैव विज्ञातव्यः। एवं चेत् प्रतिसर्गः प्रतिसृष्टिसंज्ञयोक्तः। विदुषां मते सर्गप्रतिसर्गयोर्विलोमार्थत्वाद् विरोधः। अतएव प्रति-सर्गस्य कृते क्वचित् सर्ग शब्दस्य क्वचिच्च प्रतिसंचर-शब्दस्य क्वचिल्लयशब्दस्य क्वचिदन्यत्र प्रलयशब्दस्यापि प्रयोगो विहितः। पण्डित मधुसूदन औझा महोदयाः प्रतिसर्गस्याधारं भूगतिं स्वीकुर्वन्ति। ज्योतिषशास्त्रे भूगतिरेव कालस्याधारभूता। कालनियामकत्वात्तन्महत्वं वस्तुतोऽद्यापि सर्वातिशायीति विद्वान्सः आमनन्ति। कालस्य आरम्भावसानौ कदा कुतश्च संपद्येते इति शङ्कायां भूगतेरारम्भादेव कालस्यारम्भः मन्तव्यः। एवमेव भूगतेरवरोध एव कालस्यावसानः स्वीकार्यः।

भूगतेरारम्भात् यदा कालस्यारम्भः तदैव सृष्टिप्रभवः सर्गारम्भो वा। यदा च भूगतेर्विरामस्तदा कालस्या-वसानात्प्रतिसर्गः। स एव प्रलय इत पौराणिकाः प्रवदन्ति। सर्गात् प्रतिसर्ग यावत् कालखण्डः एवं युगादिसंज्ञाम् लभते आधारत्वेन भूगतेर्ग्रहणात् भूमेरेव च सर्वाधारतया भूमण्डलं जिज्ञास्यं भवति। इदं च भूमण्डलं भूगोलस्यैव विषयः। इदं च भूगोलं ज्योतिषशास्त्रीय-संहिता ग्रन्थेषु सर्वप्रथमं निरुपितमासीत् निखिलज्योति-श्चक्रस्य सम्यग्ज्ञानाय तज्ज्ञानस्याधारभूतत्वात्। ओझा महोदयः ज्योतिश्चक्रे समासेन भूगोलमेव व्याख्याति। तन्मतेन भूगोलस्य व्याख्यानं त्रिधा संभाव्यते-

1. गणितीयाधारेण, 2. प्राकृतिकाधारेण,
3. जीवोत्पत्याधारेण

ज्योतिष शास्त्रे यस्य भूगोलस्य वर्णनं कृतं तद् गणितीयाधारेण विहितमस्ति। साहित्यादिशास्त्रान्तरेषु यस्य भूगोलस्य वर्णनं कृतं तत् प्राकृतिकाधारेण विहितमस्ति। विज्ञानादिषु विशिष्टज्ञान-शाखान्तरेषु यस्य भूगोलस्य वर्णनं कृतमस्ति तज्जीवोत्पत्याधारेण संपादितं वर्तते। ज्योतिश्चक्राख्येऽस्मिन् ग्रन्थे भूगोलसन्दर्भे अनेकेषां चिन्तनीय विषयाणामुपस्थायनं कृत्वा तच्चिन्तनाय दिग्मात्रनिर्देशं कृतं वर्तते येन मनीषिणः स्वप्रज्ञया तत्र विशेषं किञ्चिज् ज्ञातुं ज्ञापयितुं शक्नुवन्ति अत्र चिन्तनीयविषयाणामुल्लेखो निम्नानुसारम् विधातुं शक्यते-

1. भूगतिविचारः, 2. भूस्थितिविचारः, 3. भूमण्डलाकृतिविचारः, 4. भूमेरचलात्वविचारः, 5. भूगतेः स्वाश्रयत्वं पराश्रयत्वं वा, 6. भचक्रगत्याधारेण भूगतिविचारः 7. गतिद्वैविध्यविचारः, 8. भूगतौ सूर्यस्य महत्वं, 9. क्रान्तिवृत्तस्याहार्यता, 10. भूमेर्महत्व विचारः

उपर्युक्तविषयाः न केवलं भौगोलिक दृष्ट्या गणितीयदृष्ट्या ज्योतिषदृष्ट्या वा चिन्तनीया अपितु वैज्ञानिकदृष्ट्यापि चिन्तनीयाः सन्तीति निर्दिशन्ति ओझा महोदयाः। ओझा महोदयानां एतत्संदर्भितं पाण्डित्यं ग्रन्थेऽत्रावलोकनीयमस्ति। तत् विदुषां करकमलेषु प्रस्तुतवन्तो महत्प्रहर्षम् वयं व्याहरामः।

**व्याख्याता**
**श्री दादू आचार्य संस्कृत महाविद्यालयः**
**जयपुरम् ( राजस्थानम् )**

बालोपयोगिनी जीवनवृत्तमाला

❑ अविनाश शर्मा

# भारतस्य पर्वताः

रैवतकः - (गिरनार) रैवतकपर्वतः काठियावाडप्रदेशस्य प्रभासक्षेत्रस्य एकः पवित्रः पर्वतोऽस्ति। अस्य पञ्चसु प्रमुखशिखरेषु गोरक्षनाथ-शिखरं सर्वोच्चशिखरमस्ति। तस्य पर्वतस्योपरि गोमुखी-हनुमानधारा-कमण्डलकुण्ड-दामोदरकुण्ड-रेवती-कुण्डादीनि पवित्राणि जलकुण्डानि सन्ति। दामोदरकुण्डे अस्थीनि गलन्ति। अतः अत्र जनैः पूर्वजानां अस्थीनि विसर्जितानि क्रियन्ते। एतेभ्यः कुण्डेभ्यो अतिरिक्तानि अम्बामाता-बाघेश्वरीभावनाथा-दीनां मन्दिराणि विशेषतो दर्शनीयानि सन्ति। जैनसम्प्रदायस्यापि अनेकानि उत्कृष्टमन्दिराणि अस्य पर्वतस्योपरि विद्यमानानि सन्ति।

पुराणानुसारं भगवता शङ्करेण दैत्यानामुपरि अनेकशोऽनुग्रहः कृतः ततः भगवान् विष्णुस्तेषामु-परि क्रुद्धो बभूव। तदा शङ्करः कैलाशात् गुप्तो भूत्वा रैवतकपर्वतोपरि निवासं कृतवान्। तस्य प्रसन्नतार्थं सर्वे देवगणाः रैवतकपर्वतस्योपरि आगता आसन्। पार्वत्याः संगीतेन प्रसन्नेन शिवेन देवताभ्यो दर्शनम् दत्तम्। देवैः यदा शिवः प्रत्यावर्तनाय प्रार्थितः तदा शङ्करेण कथितं यद् 'यूयं यदि अस्मिन् क्षेत्रे निवासं करिष्यथ तर्हि अहं कैलाशं प्रत्यावर्तिष्ये।' देवैः शङ्करस्य तत् कथनं पूरितम्। तस्मात्कालात् सर्वेषां देवानां शिवस्यांशस्य च निवासो रैवतकपर्वतोपरि मन्यते लोकैः। रैवतकः एषु दिवसेषु ''गिरनार'' इति नाम्ना प्रसिद्धोऽस्ति। तस्य अपरं प्राचीनं नाम आसीद् उज्जयंताद्रिः।

विन्ध्यपर्वतः - भारतस्य मध्यभागे गुर्जरप्रान्ताद् बिहारपर्यन्तं विन्ध्यपर्वतः अवस्थितोऽस्ति। विन्ध्यस्य सतपुड़ापर्वतस्य च संयोगः अमरकंटकस्थले भवति। अस्मात् स्थानात् च नर्मदाया उद्गमोऽपि भवति। पुराणानुसारं विन्ध्यपर्वतः हिमालयात् मेरुपर्वतादपि च उच्चतर आसीत्। तस्यैव औन्नत्येन सूर्यस्य रथोऽपि तत्र अवरुद्धो जातः। तदा देवैः विन्ध्यस्य गुरुः अगस्त्यऋषिः प्रार्थितः। अगस्त्यो यदा विन्ध्यस्य समीपम् अगच्छत् तदा स गुरोः सम्मुखं नतमस्तको बभूव। अगस्त्येन ऋषिणा तस्मै तत्स्थाने एव विनम्रावस्थायां स्थिरनिवासस्य आदेशः प्रदत्तः। तदारभ्य विन्ध्यपर्वतस्य औन्नत्यं लघुतमं संजातम्। नर्मदाशोणभद्रादयः पवित्राः नद्यः विन्ध्याचलात् उत्पन्ना भवन्ति। प्रतिवर्षं सहस्रशः यात्रिणो नर्मदायाः परिक्रमां कुर्वाणाः विन्ध्याचलस्य अनुपमं सौन्दर्यं तस्य च सीमासु अवस्थितानाम् अनेकेषां पवित्रतीर्थानां दर्शनं कुर्वन्ति।

अरावली पर्वतः - अयं पर्वतः राजस्थानस्य आधारोऽस्ति। सिन्धप्रदेशात् पञ्चाम्बुप्रदेशात् अग्रेवर्धमानानां परकीयाणां मोहम्मदीयानां आक्रमणानि अस्य पर्वतस्य आश्रयेण रोधिता-न्यासन्। अरावली-पर्वतस्य सर्वोच्चशिखरस्य नाम अर्बुदः (आबू) इत्यस्ति। अर्बुदपर्वते जैनानां पवित्रस्थानानि वैष्णव-तीर्थान्यपि च अवस्थितानि सन्ति। देलवाड़ाप्रसिद्ध-मन्दिराणि यानि उत्कृष्टशिल्प-कौशलस्य कारणात् जगद्विख्यातानि सन्ति तान्यत्रैव सन्ति। अरावलीपर्वतस्य प्राचीनं संस्कृतं नाम आसीत् 'पारियात्रम्'। पारियात्रस्य सप्तकुल-पर्वतानां नामावलिषु गणना भवति।

**रैवतकः** - (गिरनार) रैवतक पर्वत काठियावाड-प्रदेश के प्रभास क्षेत्र का एक पवित्र पर्वत है। इसके पांच प्रमुख शिखरों में गोरखनाथ शिखर सर्वोच्च शिखर है। उस पर्वत के ऊपर गोमुखी, हनुमानधारा, कमलकुण्ड, दामोदरकुण्ड, रेवतीकुण्ड इत्यादि पवित्र जलकुण्ड है। दामोदरकुण्ड में अस्थियां गल जाती हैं। अतः यहां लोग पूर्वजों की अस्थियां विसर्जित करते हैं। इन कुण्डों के अतिरिक्त अम्बामाता, वाघेश्वरी, भावनाथ इत्यादि मन्दिर विशेष दर्शनीय है। जैन सम्प्रदाय के भी अनेक उत्कृष्ट मन्दिर इस पर्वत पर विद्यमान हैं।

पुराण के अनुसार भगवान् शंकर ने दैत्यों के ऊपर अनेक बार कृपा की इस कारण, भगवान् विष्णु उन पर क्रुद्ध हो गए। तब शङ्कर ने कैलास से गुप्त होकर रैवतक पर्वत पर निवास कर लिया। उनके प्रसन्नता के लिए सारे देवगण रैवतक पर्वत पर आए थे। पार्वती के संगीत से प्रसन्न होकर शिव ने देवताओं

को दर्शन दिया था। देवताओं ने जब शिव को लौटने की प्रार्थना की तो शङ्कर ने कहा 'आप लोग यदि इस क्षेत्र में निवास करेंगे तो मैं कैलास को लौट जाऊंगा।' देवताओं ने शङ्कर के उस कथन को पूर्ण किया। उस समय से सब देवताओं का और शङ्कर के अंश का निवास रैवतक पर्वत पर है। यह मानते हैं। रैवतक इन दिनों में 'गिरनार' इस नाम से प्रसिद्ध है। इसका दूसरा प्राचीन नाम 'उज्जयन्ताद्रि' था।

**विन्ध्यपर्वतः** - भारत के मध्य भाग में गुर्जरप्रान्त से बिहार पर्यन्त विन्ध्य पर्वत खडा है। विन्ध्य और सतपुडा पर्वत का संयोग अमरकण्टक स्थल पर होता है और यहीं नर्मदा का उद्‌गम होता है। पुराणों के अनुसार विन्ध्यपर्वत हिमालय और मेरुपर्वत से भी अधिक ऊंचा था। उसकी ऊंचाई से ही सूर्य का रथ भी वहां अवरुद्ध होने लगा। तब देवताओं ने विन्ध्याचल के गुरु अगस्त्य ऋषि को प्रार्थना की। अगस्त जब विन्ध्य के पास आए तो वह गुरु के सम्मुख नतमस्तक हो गया। अगस्त्य ऋषि ने उसको उसी विनम्रावस्था में स्थिर रहने का आदेश दे दिया। उसी समय से विन्ध्य पर्वत की ऊंचाई कम हो गई। नर्मदा, शोणभद्र आदि पवित्र नदियां विन्ध्याचल से उत्पन्न होती हैं। प्रतिवर्ष हजारों यात्री नर्मदा की परिक्रमा करते हुए विन्ध्याचल के अनुपम सौन्दर्य के और उसकी सीमा में बसे अनेक तीर्थों के दर्शन करते हैं।

**अरावली पर्वतः** - यह पर्वत राजस्थान का आधार है। सिन्ध प्रान्त तथा पंजाब प्रान्त की ओर से आगे बढने वाले परकीय मुस्लिमों के आक्रमण इस पर्वत के आश्रय से ही रोके गए थे। अरावली पर्वत के सर्वोच्च शिखर का नाम अर्बुद (आबू) है। आबू पर्वत पर जैनों के पवित्र स्थान हैं। देलवाड़ा के प्रसिद्ध मन्दिर जो उत्कृष्ट शिल्पकला के कारण जगत्‌विख्यात है, यहीं हैं। अरावली पर्वत का प्राचीन संस्कृत नाम था 'पारियात्र'। पारियात्र की सप्त कुल पर्वतों की नामावली में गणना है।

**किशनपोलबाजारः, जयपुरम्**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**तपोज्ञानादिसंभूतो मदो न क्रियते बुधैः।**
**अपेक्षया हि पूर्वस्य यतो नाचर्यते लवः।।**

विद्वानों के द्वारा तप और ज्ञान से उत्पन्न हुआ मद नहीं किया जाता। क्योंकि वे जानते हैं कि पूर्व की अपेक्षा थोड़ा भी आचरण नहीं होता।

**अहंकारं त्यजेद् धीमान् धनधान्यादिवस्तुषु।**
**यतो न शाश्वतं किञ्चिद् दुष्टराजाग्नितस्करात्।।**

बुद्धिमान् मनुष्य को धनधान्यादि वस्तुओं में अहंकार छोड़ देना चाहिये। क्योंकि दुष्ट, राजा, अग्नि और चोर के कारण कुछ भी स्थायी नहीं है।

**यो मदान्धो न जानाति हिताहितविवेचनम्।**
**स पूज्येषु मदं कृत्वा श्वानगर्दभभाग्भवेत्।।**

जो मदान्ध मनुष्य हिताहित के विवेक को नहीं जानता, वह पूज्य पुरुषों के समक्ष अहंकार प्रदर्शन करके श्वान और गर्दभ तुल्य होता है।

**अहंकारोऽपि कर्तव्यः कामक्रोधमदादिषु।**
**कर्मेन्द्रियचरित्रेषु सर्वेषु गुणशालिभिः।।**

यदि अहंकार ही करना है तो काम, क्रोध मद तथा कर्म और इन्द्रियों पर गुणशाली मनुष्यों को करना चाहिये। अर्थात् कामक्रोधदि पर नियन्त्रण रखना चाहिए।

**दुरिततरुसुनीरं कर्म क्षेत्रस्य बीजं,**
**कुमुदकरमसारं धर्मवल्ली कुठारम्।**
**कुगतिगमनहेतुं मानशत्रुं जहि त्वं,**
**सकलमपि सुसारं मार्दवं भो भजस्व।।**

हे आराधक! पापरूपी वृक्ष को सींचने में जो जल है, कर्म रूपी क्षेत्र का जो बीज है, कुत्सित मद को करने वाला है, असार है, धर्म रूपी लता को काटने हेतु कुठार है, दुर्गति गमन का कारण है- ऐसे मान (अहंकार) रूप शत्रु को छोड़ो। और सर्व सार पूर्ण मार्दव (विनम्र) की आराधना करो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

व्यंग्यात्मिका लघुनाटिका

# अश्वस्य संस्कृतशिक्षकः पण्डितः

❑ डॉ. प्रशस्यमित्रः शास्त्री

( साहित्य अकादमी द्वारा पुरस्कृतः एवं राष्ट्रपति द्वारा सम्मानितः )

## ( प्रथमं दृश्यम् )

(शनैः शनैः जवनिका अपसरति। तत्र मध्ये राजपुरोहितः श्रीज्ञानदेवः स्वकीयं बालसखायं धर्मदेवं मिलितुकामः एकस्मिन् जीर्णकुटीरे प्रविशति। तत्रैव धर्मदेवः शीर्णवसनः कांश्चित् छात्रान् अध्यापयन् दृश्यते। ज्ञानदेवं विलोक्य सहसा धर्मदेवः स्वकीयासनाद् उत्तिष्ठन् दृश्यते)

**ज्ञानदेवः** – अहो मित्र ! कीदृशस्त्वम्? कश्च समाचारः? अपि सर्वं समीचीनम्?

**धर्मदेवः** – त्वं तु पश्यसि एव। किमत्र कथनीयम्? यथा कथञ्चित् जीवनं यापयानि छात्रान् अध्यापयन्। न किल त्वादृशं बुद्धिचातुर्यं यत् कुत्रचिदहमपि राजपदवीमधिगम्य सुखमनुभवेयम्।

**ज्ञानदेवः** – परं त्वं तु अध्ययनकाले तीव्रबुद्धिः आसीः। सदैव प्रथमं स्थानं प्राप्यते स्म। कथमेतत् सर्वं संवृत्तम्? (मित्रस्य दुर्दशया किञ्चित् दुःखं नाटयति। पुनः किञ्चिद् विरम्य ब्रूते) अस्तु तर्हि श्वस्तने दिवसे राजसभामागच्छ। तत्रैव कमप्युपायं विचिन्त्य तवाऽपि प्रबन्धं करिष्यामि।

**धर्मदेवः** – तत्र मया किं कर्तव्यम्?

**ज्ञानदेवः** – त्वया तत्र राजसभायां केवलम् इदमेव करणीयं यद् राजा यत् किमपि पृच्छेत् तत् सर्वम् 'आम्' इत्युक्त्वा स्वीकारस्वरेणैव उत्तरं प्रदातव्यम्।

**धर्मदेवः** – (स्वनिर्धनतया अत्युद्विग्नतां विवशतां च नाटयन् ब्रूते) अस्तु– यथा त्वं कथयसि तथैव करिष्यामि।

(जवनिका पतति)

## द्वितीयं दृश्यम्

(जवनिका अपसरति) राजसभायां सिंहासने राजा समारूढो दृश्यते। समक्षम् उभयत मन्त्रिणां समुपवेशनानि वर्तन्ते। तत्रैव एकस्मिन् उपवेशने ज्ञानदेवोऽपि विराजते। सहसा स्वकीयादासनादुत्थाय ज्ञानदेवो राजानं ज्ञापयति)

**ज्ञानदेवः** – महाराज! अद्य प्रातःकाले एको विलक्षणपण्डितो मम दृष्टिपथमागतः। श्रूयते यत् स केवलं वर्षद्वयेनैव घोटकं संस्कृतभाषणक्षमं करोति।

**राजा** – किं कथयसि ? किं कदाचित् तुरङ्गमोऽपि संस्कृतं ब्रूते ?

**ज्ञानदेवः** – एवं महाराज ! सत्यमेवैतत्। स विलक्षणः पण्डितो मयाऽद्य भवता सम्मिलितुं निमन्त्रितोऽपि। कतिपयकालाऽनन्तरमेव स इहैव समागच्छेत्।

(एतस्मिन्नेव क्षणे राजसभायां समागत्य द्वारपालः सूचयति यत् कश्चित् पण्डितो राजानं द्रष्टुमभिलषति। राजा च तं राजसभायाम् आनेतुं निर्दिशति।)

(ततः प्रविशति धर्मदेवः पण्डितः)

**राजा**– किं नामधेयो भवान् ?

**धर्मदेवः** – अहं धर्मदेवः संस्कृत-शिक्षकः पण्डितः।

**राजा** – श्रूयते यद् भवान् घोटकं वर्षद्वयेनैव संस्कृतं शिक्षयितुं समर्थः ?

(राज्ञो वचनं निशम्य धर्मदेवः किञ्चिद् उद्विग्नः हतप्रभश्च दृश्यते। परन्तु स्वमित्रस्य ज्ञानदेवस्य वचनं स्मरति यद् राज्ञः समक्षं सर्वं स्वीकारस्वरेणैव वक्तव्यम् अस्ति। अत एव अनिच्छन्नपि तथैव वक्तुकामः कथयति)

**धर्मदेवः** – एवं श्रीमन् ! एतत्तु सरलमेव मत्कृते।

**राजा** – (मन्त्रिणं निर्दिश्य ब्रूते) अयि मन्त्रिमहोदय ! एतस्य पण्डितस्य कृते उत्तमभोजनवस्त्र-निवासादेः सुन्दरप्रबन्धो विधेयः तथा चाऽस्मै पण्डिताय संस्कृतभाषां शिक्षयितुम् एको घोटकः प्रदेयो येनाऽहं जानीयां यत् तुरङ्गमोऽपि कथं संस्कृतं वदति।

( जवनिका पतति )

## तृतीयं दृश्यम्

( जवनिका उत्तिष्ठति )

(श्री धर्मदेवः पण्डितः एकस्मिन् सुन्दरे राजप्रदत्ते

प्रासादे सुरुचिरायाम् आसन्दिकायाम् उपविशन् अत्यन्तं चिन्तामग्न उद्विग्नश्च दृश्यते। राजप्रदत्तानि नानाभोज्य-वस्तूनि तं परितस्तिष्ठन्ति। तस्य शरीरे महनीयं कौशेयवस्त्रं विराजते। तदैव सहसा तस्य सखा ज्ञानदेवः प्रविशति)

**ज्ञानदेवः** – अरे मित्र ! उद्विग्नश्चिन्तामग्नश्च दृश्यसे ? अधुना तु तव सर्वं कष्टं समाप्तम्, दरिद्रता दूरंगता। गच्छ शीघ्रं भ्रातृजायां बालकादींश्च समानीय सुखपूर्वकं निवासं कुरुष्व। अत्रैव अस्माभिः सममेव विविधपदार्थान् राजप्रदत्तभोगांश्च स्वेच्छया भुञ्जानः सानन्दो भव।

**धर्मदेवः** – तत्तु सत्यम् परन्तु यदा वर्षद्वयाऽनन्तरम् अश्वस्य परीक्षणं भवति तदाऽस्माकं किं भवेत्। किं कदाचिद् अश्वोऽपि संस्कृतभाषां शिक्षितुं शक्नोति ? त्वया कष्टसागरे निपातितः अहं तु केवलं स्वमृत्युमेव वर्षद्वयाऽनन्तरं पश्यामि।

**ज्ञानेदवः** – अरे मित्र ! किं कथयसि ? त्वं तु वृथैव चिन्तितो भवसि। शृणु सावधानं मद्वचनम्। राज्ञां समीपे बुद्धिविवेकौ न भवतः। संसारेऽस्मिन् चतुरस्तु स एव पुरुषो भवति यस्तान् सदैव – ''इन्द्रस्त्वम् वरुणस्त्वम्-कुबेरस्त्वम् इत्यादिभिः चाटुवचोभिः मूर्खान् इव कल्पयेत्।'' सर्वे चाटुकारा इदमेव कुर्वन्ति। वयमपि तु सर्वे इदमेव कुर्महे।

**धर्मदेवः** – परम् अहन्तु वर्षद्वयाऽनन्तरं स्वकीयं मृत्युमेव पश्यामि। त्वम् एतत् कथं न स्पष्टं कुरुषे यद् वर्षद्वयाऽनन्तरं मम किं भविष्यति ?

**ज्ञानदेवः** – तत् तु संकेतितमेव मया यत् किमपि नैव भविता। सम्प्रति वर्षद्वयस्य सुदीर्घः कालो वर्तते। क इदं जानाति यद् वर्षद्वये राजा मरिष्यति घोटको वा मरिष्यति ? यदि कदाचिद् राजा नैव मृतः स्यात् तदा घोटक एव मरिष्यति। एतस्योत्तरदायित्वं मम वर्तते यत् तुभ्यम् अभिनवो घोटकः प्रदास्यते... पुनः सोऽपि वर्षद्वयात् पूर्वमेव दिवङ्गतो भवेत् ...।

**धर्मदेवः** – अलम्... अलम्... साम्प्रतं त्वदीयं सर्वं वचनं निशम्य मम सर्वविधं ज्ञानं समागतम्। त्वया तु मम ज्ञान-चक्षूंषि समुद्घाटितानि। अधुना मया ज्ञातं यत् संसारे कथं वर्तितव्यम्। अहम् अद्यैव स्वकीयान् सर्वान् पारिवारिकसदस्यान् आनेतुं ग्रामं प्रस्थास्यामि।

(जवनिका पतति)

**बी-29, आनन्द नगरं रायबरेली, उ. प्रदेश )**

## संस्कृत समाचारः



जगद्गुरु रामानंदाचार्य-राजस्थानसंकृतविश्वविद्याल-ये जनवरी मासस्य द्वादश दिनांके स्वामीविवेकानंदस्य एकशताधिकपंचपंचाशत-जयंत्याः उपलक्ष्ये कार्यक्रमस्य आयोजनमभवत् कार्यक्रमस्य अध्यक्षरूपेण विश्वविद्यालयस्य कुलसचिवेनः श्री डॉ. के. सांबशिवमूर्ति महोदयेन उक्तम् यत् जीवने सर्वदा स्वामीविवेकानन्दस्य इव आचरणं कर्तव्यपालनम् च करणीयम्। गुरून् प्रति निष्ठावन्तः भवेयुः। नवभारतस्य निर्माणे संस्कृतशिक्षकाणां संस्कृतछात्राणां च मुख्यं दायित्वं वर्तते। तेन युगानुरूपम् उद्घोषः घोषितः 'छात्र देवो भव' इति। विशिष्टातिथिना व्याकरणविभागाध्यक्षेण डॉ प्रमोद शर्मणा उक्तं यत् चरित्रनिर्माणम् एव जीवनस्य निर्माणं वर्तते जीवने चरित्रस्य मूल्यं महत्वपूर्णमस्ति उत्तमेन चरित्रेण वयं जीवने सर्वस्वं प्राप्तुं शक्नुमः अस्मिन् अवसरे सारस्वतातिथिः अशोकतिवारी महोदयस्तेनोक्तं यत् यदा अस्माकम् इच्छा विवेकानंदस्य सदृशी भविष्यति तदा अस्मान् रामकृष्णपरम-हंस-सदृशस्य गुरोः प्राप्तिर्भविष्यति। भारतीयाः स्वकीयाध्यात्मबलेन विश्वं जेतुम् प्रभवन्ति। मानवदेहस्य मुख्यतत्वानि ज्ञातृत्वं मन्तृत्वं कर्तृत्वं च सन्ति। अनन्तरं मुख्यवक्ता डॉ. विनोदशर्मणा उक्तं यत् हिंदूधर्मः अतीव समुन्नतः। हैन्दवानां सभ्यता अतीव समृद्धास्ति सर्वेषां जनानां दायित्वं अस्ति यत् स्वामीविवेकानंदेन येन प्रकारेण अस्माकं संस्कृतिः वैश्विकस्तरे प्रतिष्ठापिता। भारतं विश्वगुरुः स्यात् तदर्थं वयं कटिबद्धाः भवेम। अनन्तरं कार्यक्रमे विभागीय छात्रः मोहितः पूनम शाक्य घनश्यामः शिवानी शर्मा भूपेश चौबीसा जुगलव्यासः चंद्रहंसः अमित कुमार झा दीनदयालः मोहनः लोकेशः देवेन्द्रः निखिलादयः स्वकीयान् विचारान् अप्रकटयन्। सर्वेषाम् विभागाणां शिक्षकाः छात्राः कार्यक्रमे समुपस्थिताः आसन्। मंच संचालनम् विभागीय छात्रौ आशीषगजेन्द्रौ कृतवन्तौ।

युगेऽस्मिन् संस्कृतक्षेत्रात् भविष्यति नवविवेकानन्दः इति-डॉ. के साम्बशिवमूर्तिः

# राजस्थाने संस्कृतपरम्परा

❑ अभिनव शर्मा

संस्कृतभाषा भारतीयसंस्कृत्याः आत्मा वर्तते। संस्कृतं विश्वस्यप्राचीनतमा-सार्वप्रदेशिका सार्वकालिका परिष्कृता च वैज्ञानिकभाषा अस्ति। वीरप्रसविन्याः राजस्थानस्य परमपावन्याः वसुधायाः संस्कृतसंरक्षणे संवर्धने च विशेषयोगदानं वरीवर्ति। राजस्थानप्रान्तं सर्वदा एव संस्कृतस्य गौरवमयीं परम्पराम् अग्रे नेतुं कटिबद्धं वर्तते। राजस्थानेन कदाऽपि संस्कृतं न विस्मृतम्। संस्कृतसंरक्षणे संवर्धने च राजस्थानस्य संकल्पः कदाऽपि न खण्डितः। राजस्थाने माध्यमिक-स्तरपर्यन्तं छात्राः संस्कृतं पठन्ति। शास्त्रीयशाखानाम-ध्ययनं व्यापकं विधातुं मेधाविनां कृते छात्रवृत्तेः प्रावधानं वर्तते। संस्कृतपरीक्षासु कृतभूरिपरिश्रमाणां छात्राणां कृते पुरस्कारः प्रदीयते। वेद, पुराण, धर्मशास्त्र प्रभृतीनां शास्त्रीयशाखानां कृते सर्वेषां कृते संस्कृतशिक्षायाः क्षेत्रम् उद्घाटितं वर्तते। राजस्थाने इयं भाषा केवलं आभिजात्यवर्गस्य एव नास्ति। अपितु हिन्दू-मुस्लिम-सिख-ईसाई इत्यादीनां कृते अपि संस्कृत-शिक्षायाः द्वारम् उद्घाटितं वर्तते। आदिवासीक्षेत्रेषु अपि संस्कृतविद्यालयाः संस्कृतप्रचारे संस्कृतपरम्परां वर्धितुं रताः सन्ति। कवित्रये माघः राजस्थानस्य भीनमालप्रदेश-स्य एव बभूव। प्रसिद्धो जैनविद्वान् धनपालः ज्योतिर्विद् हरिभद्रसूरिः अपि राजस्थानस्य एव बभूवतुः। आधुनिककालस्य मूर्धन्यगद्यकारेषु अन्यतमः पं. अम्बिकादत्तव्यासः अपि राजस्थानस्य एव आसीत्। अनेन लिखितम् ''शिवराज-विजयम्'' आधुनिक संस्कृतसाहित्यस्य अद्वितीया रचना मन्यते।

राजस्थाने भारते प्रसिद्धा विद्वज्जनाः समागताः आसन्। तैः संस्कृतसाहित्यस्य स्वामूल्यग्रन्थैः श्रीवृद्धिः कृता।

वैदिककालात् आरभ्य शिक्षा गुरुकुलेषु मठेषु पाठशालासु च प्रदीयते स्म। कालः परिवर्तितः शिक्षा-पद्धतिः परिवर्तिता। अद्यत्वे विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च शिक्षा प्रदीयते। राजस्थाने 1844 ख्रीष्टाब्दे संस्कृतकालेजस्य स्थापना सञ्जाता। महाविद्यालयः अयं भारतप्रसिद्धेषु प्राचीनेषु संस्कृत-शिक्षणकेन्द्रेषु अन्यतमं शिक्षाकेन्द्रमासीत्। आभारत-वर्षात् संस्कृताध्येतारः अत्र समागच्छन्ति स्म। प्रसिद्धा जनश्रुतिः वर्तते यत् ''वाराणसी वा जयपत्तनं वा'' इति अर्थात् चूडान्तवैदुष्यप्राप्तये अध्येतारः काशीं प्रति गच्छन्ति स्म जयपुरं प्रति वा इति।

तत्काले आभारतवर्षं षट्सप्त संस्कृतपरीक्षाप्रणाल्यः एव देशख्याता आसन्। यासु जयपुरपरीक्षायाः द्वितीयं स्थानम् आसीत्। अन्याः परीक्षासंस्थाः बनारस, लाहोर, बडौदा, दरभंगा, कलकत्ता, मद्रास, बेंगलूरुनगरेषु च आसन्। सम्भवतः संस्कृतपरीक्षासु आदौ आधुनिक-विषयाणां पाठ्यक्रमः राजस्थान एव आरब्धः। अनेन 1949 ई. वर्षे संस्कृतपरीक्षाणाम् आधुनिकीकरणं कृतम् 1958 ख्रीष्टाब्दे पृथक् संस्कृतनिदेशालयः स्थापितः। प्रवेशिकाया उपाध्यायस्य च परीक्षाः 1962 तः माध्यमिक शिक्षा बोर्ड द्वारा स्वीक्रियन्ते। शास्त्री, आचार्य इत्यादि परीक्षा आदौ राजस्थानविश्वविद्यालयेन तदनन्तरम् अजमेर विश्वविद्यालयेन स्वीक्रियन्ते स्म। अनन्तरं जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत-विश्वविद्यालयस्य स्थापना अभवत्। परम्परागत-महाविद्यालयाः संस्कृतविश्वविद्यालयस्य संरक्षणे सञ्चाल्यमानाः अभवन्। एकोनविंशतिशताब्द्यां संस्कृतस्य पञ्चविश्वकोषाः प्रकाशिताः। तेषु एकः राजस्थानप्रान्तस्य उदयपुरस्य सज्जनमुद्रणालयात् प्रकाशितः यथा देशस्य प्राचीनपाण्डुलिपिकेन्द्रेषु अड्यार (मद्रासः) बडोदा, पूना, बनारसस्य च ग्रन्थालयाः प्रसिद्धिं प्राप्ताः वर्तन्ते। तथैव राजस्थानस्य जैसलमेरस्य, जयपुरस्य, बीकानेरस्य च ग्रन्थालयाः सुविख्याता वर्तन्ते। अधुनाऽपि जयपुरपोथीखाना, बून्दीस्थ प्रासादेषु, चित्तौडनगरे, नाथद्वारा तथा कांकरोलीग्रन्थागारेषु नैकाः अमूल्याः संस्कृतपाण्डुलिपयः विद्यन्ते। आयुर्वेदस्य ज्योतिष-

शास्त्रस्य च अध्ययनक्षेत्रे अपि राजस्थाने कार्यम् अभवत्। देशे सर्वप्रथमं सवाईजयसिंहस्य शासनकाले यूनानी एवं अरबी ज्योतिषग्रन्थानां संस्कृते अनुवादोऽभवत्। अत्र राष्ट्रीय-आयुर्वेद-संस्थानम्, पृथक् आयुर्वेदनिदेशालयः च देशस्य प्रमुखायुर्वेदकेन्द्रेषु गण्यते। विश्वस्य सर्वाधिकप्राचीनग्रन्थरूपे वेदानां अनुशीलनं व्याख्यानं निर्वचनं च देशविदेशेषु सहस्रवर्षेभ्यः प्रचलितं वर्तते। देववाण्याः प्रचाराय प्रसाराय च नैकाः संस्था राजस्थान प्रान्ते कार्यरताः वर्तन्ते। विविधाः संस्थाः शासकीयसंस्थाः सन्ति। काश्चन शासकीयेतरसंस्थाः स्थापिताः सन्ति। सर्वकारीयसंस्थानां सञ्चालनं संरक्षणं च राजस्थानसर्वकारेण केन्द्रसर्वकारेण च नियमानुसारं क्रियते। असर्वकारीय-संस्थानां सञ्चालनं संरक्षणञ्च संस्कृतज्ञाः सामाजिकजनाः सम्मिल्य कुर्वन्ति।

क्रमेऽस्मिन् केन्द्रशासनस्य मानवसंसाधनविकास-मन्त्रालयेन सञ्चालितं राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः राजस्थाने संस्कृतसंस्थारूपेण विद्यते। अत्र परम्परागतरूपेण शास्त्राणां पठनं-पाठनं संस्कृतमाध्यमेन भवति। परम्परागतविधिना पठने छात्राणां रुचिं दृष्ट्वा राजस्थाने राजस्थानसंस्कृतविश्व-विद्यालयस्य पृथक् स्थापना कृता।

राजस्थानसर्वकारेण राजस्थानसंस्कृतविश्व-विद्यालयस्य स्थापना 2001 तमे वर्षे कृता। विश्वविद्यालयस्याधीन्ये सम्प्रति त्रयोदश (13) स्थायिन्यः, पञ्चदश (15) अस्थायिन्यश्च शास्त्रीस्तरीय-महाविद्यालयीयसंस्थाः सञ्चालिताः वर्तन्ते। आचार्यस्तरे पञ्चदश स्थायिन्यः, दश अस्थायिन्यः, महाविद्यालय-संस्थाः सन्ति। शिक्षाशास्त्रीस्तरे पञ्चसंस्थाः (5) स्थायीरूपेण स्थापिताः सन्ति। अस्थायीरूपेण द्विषष्टिः (62) शिक्षाशास्त्रिसंस्थाः वर्तन्ते। आहत्य स्थायी-संस्थानां संख्या 33 सन्ति।

अस्थायीसंस्थानां संख्या नवाशीतिः (89) अस्ति। आहत्य 122 संस्थाः वर्तन्ते राजस्थानसंस्कृतविश्व-विद्यालयस्य संरक्षणे। 1958 तः एव पृथक् संस्कृत-शिक्षानिदेशालयः स्थापितः अस्ति। निदेशालयस्याधीने 2605 संस्थाः सञ्चालिताः वर्तन्ते।

अधुना संस्कृताध्ययनाध्यापनयोः पद्धतिद्वयम् आश्रीयते। संस्कृतशिक्षा क्षेत्रे प्रथमा पद्धतिः वर्तते परम्परागतपद्धतिः इति। द्वितीया पद्धतिः आधुनिक-पद्धतिः वर्तते। परम्परागतपद्धतिम् आश्रित्य संस्कृतशिक्षा निदेशालयः, संस्कृतविश्वविद्यालयः राष्ट्रियसंस्कृत-संस्थानञ्च प्रयत्नरताः वर्तन्ते। पुनश्च आधुनिक विश्वविद्यालयेषु आधुनिकैः विषयैः सह संस्कृतमपि स्वतन्त्रविषयरूपेण पाठनार्थं संस्थाः सक्रियाः सन्ति। तेषु विश्वविद्यालयेषु राजस्थानविश्वविद्यालयः अन्यतमः वर्तते। राजस्थान विश्वविद्यालयस्य स्थापना 1947 तमे वर्षेऽभवत्। संस्कृतज्ञानां प्रयत्नेन अत्र स्वतन्त्र संस्कृत-विभागस्य स्थापना 1962 ख्रीष्टाब्दे कृता।

राजस्थाने संस्कृतपरम्परा अहर्निशं पुष्पिता-पल्लविता च भवेत्। सम्पूर्णप्रदेशः सुसंस्कृतः ज्ञानसमृद्धः भवेत्। एतत्कृते कृतसंकल्पा वर्तते राजस्थानस्य ''राजस्थान-संस्कृत-अकादमी'' इति। 1980 तमे वर्षे संस्कृतदिवसस्य पुण्यवेलायां अकादम्या स्थापनायाः उद्घोषणा जाता। शासकीयेतरसंस्थासु संस्कृतभारती, संस्कृतपरिषद्, विद्याभारती, राजस्थान-संस्कृत-संसद्, राजस्थान-संस्कृत-साहित्य-सम्मेलनम्, वैदिक-संस्कृति-प्रचारक-संघः, युगपुरुष मञ्जुनाथ-स्मृति-संस्थानम्, रायबहादुर-चम्पालाल-शोध-संस्थानम्, राजस्थान-ज्योतिष-परिषद् एवं शोधसंस्थानम्, व्यास-बालाबक्ष-शोधसंस्थानम्, हरिसेवा-निम्बार्क-संस्कृत-समितिः, राजस्थान-प्राच्य-विद्या-शोधप्रतिष्ठानम्, प्रभृतयः संस्थाः संस्कृतस्य प्रचारं प्रसारञ्च कुर्वन्ति। वस्तुतः एतत् तु सङ्केतमात्रमेव वर्तते, राजस्थाने इतोऽपि नैकाः संस्कृतसंस्था संस्कृतसेवार्थं कार्यं क्रियमाणाः सन्ति। राजस्थाने प्राथमिकशिक्षातः आरभ्य उच्चशिक्षा-पर्यन्तम् आँग्लेयानां आगमनात् पूर्वं संस्कृतमाध्यमेन एव अध्ययनमध्यापनं भवतिस्म। व्यवहारभाषा आसीत् संस्कृतम्। शिक्षाशास्त्रिणः मन्यन्ते यत् संस्कृताध्ययनरूपे

विचारविनिमयस्य भाषा आसीत्। राजस्थानस्य भूमौ संस्कृताध्ययनाध्यापनयोः व्यवस्था प्राचीनकालात् प्रवर्तते। 1844 तमे वर्षे महाराजसंस्कृतमहाविद्यालय-स्य स्थापना अभवत्। वस्तुतः तदानीम् आभारतवर्षं कानिचन शिक्षणकेन्द्राणि एव आसन्।

संस्कृताध्ययनाय दूरात् शिक्षार्थिनः अत्र समागच्छन्ति स्म। 1885 तमे वर्षे दिगम्बरजैनसंस्कृत-महाविद्यालय-स्य स्थापना अभवत्। 1920 तमे वर्षे आयुर्वेदस्य उन्नायकेन स्वामिलक्ष्मीरामवैद्येन दादूमहाविद्यालयस्य स्थापना कृता। उपर्युक्ताः चर्चिताः महाविद्यालयाः सम्प्रति जगद्गुरुरामानन्दाचार्यसंस्कृत-विश्वविद्यालयेन स्व संरक्षणे संचाल्यमानाः वर्तन्ते।

उदयपुरस्थ मोहनलाल सुखाडिया-विश्वविद्यालये 1964 तः पृथक्रूपेण संस्कृविभागः सञ्चालितः अस्ति। संस्कृतोच्चशिक्षायाः क्रमेऽस्मिन् जोधपुरनगरस्य जयनारायणव्यास विश्वविद्यालये 1966 ई. तः स्वतन्त्र-रूपेण स्नात्तकोत्तरस्तरे संस्कृतपाठः भवति।

1987 ख्रीष्टाब्दे अजयमेरूनगरे महर्षिदयानन्दविश्व-विद्यालयस्य स्थापना अभवत्। अत्र संचालिते संस्कृतविभागे स्नातकोत्तर (एम.ए.) विद्यावारिधेः हेतोः अध्ययन-अध्यापनस्य उत्कृष्टव्यवस्था वर्तते। विश्वविद्यालयस्याधीने केचन महाविद्यालयाः सन्ति। अत्रापि महाविद्यालयेषु सामान्यसंस्कृताध्यापना-ध्यापनयोः कार्यं सम्पाद्यते विश्वविद्यालयेन।

राजस्थानस्य नालन्दा इति नाम्ना प्रसिद्धस्थाने कोटानगरे वर्धमान-महावीर-खुला-विश्वविद्यालयः स्थापितः अस्ति। अत्र पत्राचार-पाठ्यक्रममाध्यमेन संस्कृतशिक्षा प्रदीयते। क्रमेऽस्मिन् जैन-विश्व-भारती, लाडनूँ एवं वनस्थली विद्यापीठं प्रभृतयः संस्थाः अपि संस्कृतपरम्परायाः संरक्षणे कटिबद्धाः सन्ति।

सम्पूर्णे राजस्थाने माध्यमिकस्तरपर्यन्तं संस्कृतभाषा अनिवार्यविषयत्वेन पाठ्यते सम्प्रति।

**शोधछात्रः**
**मो.: 90797330**

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम.............................................पुत्र/पुत्री श्री............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस....................................**

**तहसील................................जिला........................राज्य.....................................**

**देश...................पिन.........................................दूरभाष........................................**

**मोबाईल नं...........................ईमेल.........................................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**
**ई–मेल – sanskritbharti09@gmail.com**

# संस्कृतसमाचारः




संस्कृतभारती जयपुरपक्षतः जनवरीमासस्य षड्-दिनाङ्के मानसरोवरे स्थिते आदर्श-विद्यामन्दिरे ''जनपद-संस्कृतसम्मेलनस्य'' आयोजनम् अभवत्। सम्मेलनस्य अध्यक्षरूपेण राजस्थान-सार्वजनिक-प्रन्यास-मण्डलस्य सभापतिनाः श्री एसडी शर्मणा उक्तं यत् भारतस्य एकतायाः अखण्डतायाश्च कृते संस्कृतभाषायाः आवश्यकता अस्ति। भारतं पुनः विश्वगुरुकरणार्थं संस्कृतस्य प्रचार-प्रसारः आवश्यकः वर्तते। मुख्यातिथिः आईएएस के. के. पाठकेन संस्कृतभाषायाः महत्वविषये उक्तं यत् संस्कृतभाषायाः विश्वस्य सर्वाः भाषाः उद्भूताः सन्ति। एषा अद्यतनीया वैज्ञानिकी भाषा अस्ति आगामी बौद्धिकतायाः युगः वर्तते। अस्मिन् अवसरे प्रान्तस्य सम्पर्कप्रमुखेन श्रीरघुवीर शर्मणा उक्तं यत् अद्यतनीय-समाजे यदि संस्कृतं व्यावहारिकी भाषा न भविष्यति तर्हि आगामिसंतत्या संस्कृतेः नाशस्य आक्षेपः अस्माकमुपरि आरोपिष्यते। अस्मिन् कार्यक्रमे जयपुरजनपदस्य प्रत्येक-नगरात् जनाः भागं गृहीतवन्तः तेषु सामाजिकानां संख्या सर्वाधिकाऽऽसीत्। कार्यक्रमस्य संयोजनं श्रीप्रकाशशर्मणा कृतम्। समारोहे अन्ये अतिथयः जगद्गुरु-अवधबिहारी देवाचार्यः, संस्कृत भारत्याः क्षेत्रीय-सङ्गठनमंत्री श्री हुल्लासचन्दः, आरएसएससङ्गठनस्य क्षेत्रीय-बौद्धिक-शिक्षण-प्रमुखः श्रीकैलाशचन्द्रः, राजस्थानसंस्कृत-विश्वविद्यालयस्य साहित्यविभागस्य सहायकाचार्यः डॉ. उमेश नेपालः च एते सर्वेऽपि स्वकीयविचारान् प्रकटितवन्तः। उभयोः सत्रयोः मध्ये मनमोहकेन सांस्कृतिककार्यक्रमेण सर्वेषां जनानां मनोरंजनं कारितम्। सम्मेलनस्य प्रतिवेदनं जयपुर-महानगरस्य मन्त्रिणा श्रीसन्तोषशर्मणा प्रस्तुतम्। सम्मेलनस्य सम्पूर्ण-प्रबंधनं जयपुर-प्रान्तस्य प्रचारप्रमुखेषा जनपदस्य पालकेन च घनश्याम हरदेनियाँ इत्यनेन दृष्टम्। कार्यक्रमे प्रान्तमंत्री श्री चन्द्रशेखरः शर्मा, प्रान्तप्रचार-प्रमुखः, विभाग-संयोजकः श्रीकानाराम जाटः, सहसंयोजकः श्रीअभिनव उपाध्यायः, सम्मेलनसमितेः अध्यक्षः बिरदीचन्दचौधरी उपाध्यक्षः अजय रावतः, अमितभारद्वाजः, मनीषशर्मा, महेंद्रशर्मा, दीपकशर्मा आदयः बहवः कार्यकर्तारः संस्कृतप्रेमिणश्च उपस्थिताः आसन्।





# डॉ. रामकुमारदाधीचस्य व्यक्तित्वं कृतित्वञ्च

❑ बिमला मील

डॉ. रामकुमारदाधीचस्य जन्मस्थानं राजस्थानप्रदेशे शेखावाटीक्षेत्रे सीकरमण्डले नरोदराख्यो ग्रामो वर्तते। तत्र दाधीचविप्राणां कश्चिदन्वयो वसति। तत्र श्रीमद्भागवत-कथापारायणपरस्य श्रीरामेश्वरलालस्य कनिष्ठपुत्रत्वेन 1959 तमे ईशवीयाब्दे सितम्बरमासस्य सप्तमदिनाङ्के डॉ. रामकुमारदाधीचो जनिं लेभे। कविना लोकदेवकथामृते कविपरिचयप्रसङ्गे लिखितम्-

**नरोदराख्यसुग्रामे सीकरमण्डलस्थिते।**
**पण्डितानां कुलं ख्यातं वसत्येकं सनातनम्।।**
**श्रीरामेश्वरलालोऽभूद दधीचेरन्वये सुधीः।**
**ज्ञानिरामात्मजस्तत्र भागवतपरायणः।।**
**रामकुमारसंज्ञोऽहं तत्तनयो वशंवदः।**
**विदुषां सेवको देववाणीशिक्षणतत्परः।**

पैतृकसंस्कारात् पारिवारिकवातावरणप्रभावाच्च कविरयं बाल्ये वयस्येव श्रीमद्भागवतकथारसिकः सांस्कृतिकपरम्परानुरक्तश्चाभूत्। श्रीमद्भागवतपुराणे प्राचीनराजवंशवर्णनं बालकाय रामकुमाराय नितरां रोचते स्म।

## शिक्षा

बालकस्य रामकुमारस्य शिक्षार्जनं ग्रामादेव प्रारब्धम्। अयं तदनन्तरं संस्कृताध्ययनाय लक्ष्मणगढ-नगरस्थिते श्रीऋषिकुलविद्यापीठे प्रवेशिका-कक्षायां प्राविशत्। तदा श्री ऋषिकुलविद्यापीठे प्रख्यातविद्वांसः श्रीनन्दकुमारशास्त्रिणः प्राचार्यपदमलङ्कुर्वाणाः व्यराजन्त। तत्र व्याकरणशिक्षकपदभाजां श्रीगणेशदत्त-त्रिवेदिनां सान्निध्ये व्याकरणम्, साहित्यशिक्षकपदभाजां श्रीनटरवरलालशास्त्रिणां सान्निध्ये साहित्यञ्चाधीत्य प्रवेशिकापरीक्षां प्रथमश्रेण्यां समुदतरत्।

समुत्तीर्णप्रवेशिकापरीक्षोऽयं तत्रैव साहित्योपा-ध्यायकक्षायां प्रविष्टः परीक्षायां प्रथमश्रेणीं लब्धवान्। तदनु चायं बीकानेरस्थिते श्रीशार्दूलविद्यापीठसंज्ञके अनुदानितसंस्कृतमहाविद्यालये साहित्यशास्त्रिकक्षायां प्राविशत्। इदानीं स राजकीय संस्कृतमहाविद्यालयः सञ्जातः। तत्र प्राचार्यपदमलङ्कुर्वतां व्याकरणकेसरिणां पं. विश्वनाथमिश्रमहाभागानामस्मिन् वात्सल्यातिरेक आसीत्। अनेन तत्र वर्षत्रयं पं. द्वारकानाथशुक्ल-महाभागात् संस्कृतवाङ्मयमधीतम्। तत्रैव कविना प्रकाण्डपण्डितस्य आजादमिश्रमहाभागस्यापि सान्निध्यं-प्राप्तम्। कविना स्वगुरवः सादरं स्मृताः।

ततोऽयमाचार्यकक्षायामध्ययनाय पिलानीनगरस्थे श्रीबिड़लासंस्कृतमहाविद्यालये प्रवेशं प्राप्तवान्। तत्र वात्सल्यमूर्तेः प्राचार्यस्य श्रीगजाननमिश्रस्य सान्निध्ये साहित्याध्ययनं कृतम्। तस्मिन् समये भारतप्रसिद्धशोध-पत्रिकायाः मरुभारत्याः सम्पादकाः डॉ. वसन्तलाल-शर्माणः साहित्यविषयमपाठयन्। तत्कृपया शोधपद्धतिं विज्ञाय कविना लघुशोधप्रबन्धस्य रचना पाठ्यक्रमाङ्ग-त्वेन कृता। अनेन साहित्याचार्यपरीक्षा प्रथम-श्रेण्यामुत्तीर्णा।

## सेवावृत्तिः

कविः डॉ. रामकुमारदाधीचः साहित्याचार्यपरीक्षां समुत्तीर्य कोटानगरस्थिते श्रीसरस्वतीविद्यापीठाख्ये अनुदानितसंस्कृतमहाविद्यालये साहित्यविषयस्य प्राध्यापकपदेऽध्यापनवृत्तिम् अकरोत्। तत्र 1983 ईशवीयाब्दपर्यन्तं सेवां कृत्वा जयपुरस्थे अनुदानिते दादूसंस्कृतमहाविद्यालये सेवामकरोत्। ततोऽनेन पिलानीस्थिते श्रीबिड़लासंस्कृतमहाविद्यालये साहित्य-प्रोफेसरपदे अध्यापनकार्यं कृतम्। तत्रैव कविना राष्ट्रियसंस्थाननवदिल्लीतः विद्यावारिधिशोधोपाधिः प्राप्तः।

अयं 1993 ईशवीयाब्दस्य दिसम्बरमासे राजकीय-सेवायां भाषाविज्ञानविषयस्य प्रोफेसरपदे नियुक्ति-मलभत। प्रथमा नियुक्तिः मनोहरपुरस्थिते राजकीय-धूलेश्वरसंस्कृतमहाविद्यालये सञ्जाता। तदैव कविना नवस्थापितस्य जगद्गुरुरामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालयस्य आधुनिकज्ञानविज्ञानसंकायस्य संकायाध्यक्षपदं निर्व्यूढम्।

तदनु कविना स्थानान्तराधारेण अजमेर-उदयपुर-सीकरनगराणां राजकीयसंस्कृतमहाविद्यालयेषु शिक्षणकार्यं कृतम्। 2012 तमे ईशवीयाब्दे कविरयं पदोन्नतिं प्राप्य श्रीकल्याणराजकीयसंस्कृतमहाविद्यालये प्राचार्यपदे नियुक्तोऽभूत्। ततः 2015 तमे ईशवीयाब्दे जयपुरस्थे संस्कृतशिक्षानिदेशालये संयुक्तनिदेशकपदे प्रतिनियुक्तिं प्राप्य 1916 ईशवीयाब्दपर्यन्तं तत्र कार्यं कृतम्। तदनु 1916 तमे ईशवीयाब्दे कोटास्थिते राजकीयसंस्कृतमहाविद्यालये प्राचार्यपदे स्थानान्तरणं प्राप्य तत्र सेवारतो वर्तते।

एतेन परिचयवर्णनेन ज्ञायते यद् डॉ. राजकुमार-दाधीचेन बाल्यादेव भारतीयसंस्कृतिप्राणितं वातावरणं प्राप्तम्। सांस्कृतिकेतिहासस्याध्ययने पर्यटने च कवेः विशेषरुचिरस्ति। कविना मातृभाषायां प्रचलितानां कुलदेवी-लोकदेवसम्बद्धानां लोककथानामध्ययनं कृतम् पर्यटनेन इतिहासाध्ययनेन च तत्सम्बद्धाभिलेखानां विवरणं प्राप्तम्। अनेन सांस्कृतिकेतिहासाश्रितैव काव्यरचना प्रायेण कृता। अयं इतिहासमाध्यमेन राष्ट्रस्य सुप्तचेतनायाः जागरणाय प्रयासमकरोत्। अस्य विश्वासोऽस्ति यत् ऐतिहासिकगौरवस्य पुनर्जागरणं राष्ट्रीयोत्थानाय परमावश्यकम्। राष्ट्रस्य परम्पराः संस्कृतिश्च तस्मै नवजीवनं यच्छन्ति।

डॉ. रामकुमारदाधीचस्य काव्यरचनाप्रयोजनम् इतिहासस्य पुनरावृत्तिमात्रं न, अस्य मतेन सांस्कृतिकेतिहासः राष्ट्रीयशक्तिस्रोतः। कवेरियं मान्यतैवास्य काव्यप्रवृत्तिनिमित्तम्।

**7. डॉ. रामकुमारदाधीचस्य कृतित्वम्**

डॉ. रामकुमारदाधीचस्य संस्कृतकृतयश्चतुर्धा विभज्यन्ते-

(1) काव्यकृतयः (2) इतिहासकृतयः
(3) व्याख्याकृतिः (4) निबन्धकृतयश्च

**काव्यकृतयः**

डॉ. रामकुमारदाधीचस्य काव्यकृतयः पञ्चविधाः सन्ति-

(1) लघुकथा (2) लोककथा
(3) खण्डकाव्यम् (4) मुक्तककाव्यम्
(5) छन्दोमुक्ताकविता च।

**(1) लघुकथा :-**

(1) माघस्यान्तिमा रात्रिः (2) सर्वोदयः

**(2) लोककथाः-**

(1) आरासुरीमातृकथा (2) आशापुरामातृकथा
(3) करणीमातृकथा (4) जीणमातृकथा
(5) दधिमथीमातृकथा (6) सच्चियायमातृकथा
(7) सुन्धामातृकथा (8) हिंगलाजमातृकथा
(9) कैलामातृकथा (10) महालक्ष्मीमातृकथा
(11) शीतलामातृकथा

**खण्डकाव्यम् :-**

(1) श्यामदेवकाव्यम् (2) रामदेवकाव्यम्
(3) गोगादेवकाव्यम् (4) तेजोदेवकाव्यम्
(5) देवनारायणकाव्यम् (6) पाबूदेवकाव्यम्

**मुक्तककाव्यम् :-**

(1) नारीगौरवम् (2) पद्याष्टकम्
(3) राजस्थानवैभवम्

**छन्दोमुक्ता कविता-**

(1) कन्याक्रन्दनम् (2) नारीनियतिः

**इतिहास ग्रन्थाः** - रामकुमारदाधीचेन त्रयः इतिहास-ग्रन्थाः रचिताः सन्ति-

(1) आधुनिक संस्कृतसाहित्येतिहासः
(2) प्राचीन भारतस्य साहित्यिकः
(3) सांस्कृतिकश्चेतिहासः

**शोधछात्रा**
**ज.रा.रा.सं.वि.वि., ग्राम-मदाऊ**
**पोस्ट-भांकरोटा,जयपुर**

# रोगविचारप्रसङ्गे ग्रहाणां परिचयः

❑ डॉ. किरण शर्मा

**रोगविचारप्रसङ्गे ग्रहाणां परिचयः** - कः ग्रहः कस्य तत्त्वस्य प्रतिनिधित्वं करोति? तस्य बृहत्ता वर्णश्च कीदृशः ? सः शरीरस्य कांस्कान् अङ्गान् प्रभावयति तथा च कांस्कान् रोगान् उत्पादयितुं शक्नोति ? आसां वार्तानां विचारः ज्योतिषग्रन्थेषु विस्तारपूर्वकेण कृतो वर्तते। तदित्थम्-

**1. सूर्यः** - अयम् अग्नितत्त्वस्य मध्यमलम्बता शुष्कश्च ग्रहोऽस्ति। अयं मनुष्याणां दक्षिणनेत्रम्, स्त्रीणां वामनेत्रम्, आयुः, अस्थिं शिरः, हृदयम्, प्राणशक्तिम् मेदां, रक्तं पितं च प्रभावयति। यद्ययं बली तर्हि अस्थिः स्वस्था शरीरं स्वस्थञ्च भवति तथा च निर्बले सति रोगकारके वा तदा क्षयः पित्तप्रकोपः, नेत्ररोगः, अस्थिरोगः, शिरोरोगः, हृद्रोगः, उष्णवातः, ज्वरः, मूर्च्छा, रक्तस्रावः, चर्मरोगः, अतिमूर्च्छा, शूलश्च भवतिं।

**पित्तोष्णज्वरतापदेहतपनापस्मारहृत्क्रोश-**
**जव्याधीन्वक्ति रविर्हगात्यरिमयं त्वग्दोषमस्ति**
**स्त्रुतिम्। फलदीपिका अ. 14 श्लो. 2**

**2. चन्द्रमा** - अयं जलतत्त्वस्य, दीर्घलतायुक्तः जलीयग्रहः अस्ति। अयं व्यक्तेः, वामनेत्रं, स्त्रियाः दक्षिणनेत्रं, स्तनं वक्षः, यकृतं, मनः मस्तिष्कं उदरं मूत्राशयं, रक्तं रसधातुं, शारीरिकपुष्टिं कफञ्च प्रभावयति। अस्य सबले सति शरीरे रक्तसञ्चारः सम्यक् भवति, आरोग्यवृद्धिः मनोबलं च उन्नतं भवति। निर्बले अशुभे रोगकारके वा सति कफरोगः मूत्रविकारः जलोदरः मुखरोगः, नासिकारोगः, पाण्डुः, क्षयः, मन्दाग्निः, अतिसारः, स्त्रीसंसर्गजन्यरोगः, प्रदरः, अपस्मारः, वातश्लेष्मा, मानसिकरोगश्च भवति।

**निद्रालस्यकफातिसारपिठकाः शीतज्वरं चन्द्रमा,**
**शृंग्यव्जाहतिमग्निमान्द्यमरुचिं योषिव्यथाकामिला।।**
**फलदीपिका अ. 14 श्लो. 3**

1. फलदीपिका अ.-14 श्लोक-2

**3. भौमः** - अयम् अग्नितत्त्वस्य, लघुलम्बतायुक्तः शुष्कग्रहः अस्ति। अयं शरीरे कपालं कर्णे स्नायुं जननेन्द्रियं मज्जां जङ्घापुष्टतां शारीरिकशक्तिं दाहं शोथं धैर्यं पित्तञ्च प्रभावयति। अस्मिन् सबले सति व्यक्तिशरीरास्थयः सुदृढाः भवन्ति, प्रतिरोधशक्तिः वर्धते, तथा च साहसधैर्यवृद्धिः भवति। निर्बलः अशुभः रोगकारकः वा स्याद्यदि तर्हि रक्तविकारः, रक्तचापः ब्रणादयः, खाजः, फुल्लनम्, महामारीजन्यरोगः, गुप्तरोगः, अग्निदाहः, मुष्कवृद्धिः, शल्यक्रियावश्यकरोगश्च भवति।

**तृष्णासृक्कोपपित्तज्वरमनलविषास्तार्तिकुक्षाक्षिरोगान्।**
**गुल्मापस्मारमज्जाविहतिपरुषतापामिकादेहभंगान्।**
**फलदीपिका अ. 14 श्लो. 4**

**4. बुधः** - अयं पृथ्वीतत्त्वस्य सामान्यलम्बतायुक्तः जलीयग्रहः अस्ति। शरीरे अयं जिह्वां वाणीं स्वरचक्रं श्वासनलिकां मस्तिष्काग्रं फुफ्फुसं मज्जातन्तुं केशं मुखं हस्तं त्रिधातुं च प्रभावयति। अस्मिन् वलवति सति बालकस्य बुद्धिः पूर्णविकसिता, तस्य व्यक्तित्वमाकर्षकं तथा च प्रतिपादनशैली मोहिका भवति। निर्बले रोगकारके वा सति मूर्च्छा, हिस्टीरिया, मानसिकरोगः, चक्करागमनम्, न्यूमोनिया, विषमज्वरः, त्रिदोषज्वरः, टाइफाइड, पाण्डुः, संग्रहणी, शूलः मन्दाग्निः, गण्डविकारः, वाणीविकारः, उदरविकारः, कण्ठरोगः, नासिकारोगः, स्नायुरोगश्च भवति।

**भ्रान्तिं दुर्वचनं हगामपगलघ्राणेत्थरोगं ज्वरं,**
**पित्तं श्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वामयान्।**
**दुःस्वप्नं च विचर्चिकाग्निपतने पारुष्यबन्धश्रमान्।**
**फलदीपिका अ. 14 श्लो. 5**

**5. गुरुः** - अयम् आकाशतत्त्वस्य (मतान्तरेण वायुतत्त्वम्) मध्यमलम्बतायुक्तः (मतान्तरेण ह्रस्वल-

1. फलदीपिका अ.-14 श्लोक-1

म्बतायुक्तः) जलीयो ग्रहः अस्ति। शरीरे अयं मांसं वीर्यम् उदरं यकृतं रक्तधमनीं त्रिदोषतया कफं च प्रभावयति। अस्मिन् बलवति सति शरीरं पुष्टम्, विचारशक्तिः समीचीना मनसि शान्तिः, मनोयोगश्च स्यात्। निर्बले सति अशुभे रोगकारके वा उदरविकारः, मज्जादोषः, यकृद्रोगः, प्लीहा, स्थूलता, दन्तरोगः, वायुविकारः, मूर्च्छा, मस्तिष्कविकारः, ज्वरः, कर्णरोगः, उच्चैः पतनम्, मानसिकचिन्तोत्पत्तिश्च भवन्ति।

**आचार्य देवगुरुभूसुरशापदोषैः।**
**शोकं च गुल्मरुजमिन्द्रगुरुः करोति।।**

**6. शुक्रः** - अयं जलतत्त्वस्य मध्यमलम्बतायुक्तः (मतान्तरेण ह्रस्वः) जलीयः ग्रहः अस्ति। शरीरे अयं जननेन्द्रियं शुक्राण्डं नेत्रं कपोलं चिबुकं स्वरं रसं गर्भाशयं संवेगशक्तिञ्च प्रभावयति। अस्मिन् बलवति सति शरीरं मांसलयुक्तम्, मनुष्यस्य कामशक्तिः बलवती, वीर्यं पुष्टञ्च भवति। निर्बले अशुभे रोगकारके वा सति मूत्रविकारः, वीर्यविकारः, गुप्तरोगः, स्त्रीसंसर्गजन्यरोगः, मादकद्रव्य-सेवनजन्यरोगः, विषजन्यरोगः, उपदेशः, प्रमेहः, मधुमेहः, प्रदरः, कफवायुविकारः, पाण्डुरोगश्च भवति।

**पाण्डुश्लेष्ममरुत्प्रकोपनयनव्यापत्प्रमेहामयान्।**
**गुह्यस्यामयमूत्रकृच्छ्रमदनव्यापत्तिशुक्लस्रुतिम्।**
**वारस्त्रीकृतदेहकान्तिविहतिं शोषामयं योगिनी।।**
**अध्याय 14 श्लो. 7**

**7. शनिः** - अयं वायुतत्त्वस्य, लम्बमानलम्बता-युक्तः शुष्कग्रहः अस्ति। अयं शरीरे अस्थीनां बन्धं पादं जानुं वातसंस्थानं स्नायुसंस्थानं मज्जां वातञ्च प्रभावयति। अस्मिन् बलवति सति स्नायुमण्डलं पुष्टं शरीरं सुदृढं च भवति। निर्बले अशुभे रोगकारके वा सति वायुविकारः, स्नायुविकारः, सन्धौ वेदना, सन्धिवेदना, सन्धिवातः, पक्षाघातः, मौर्ख्यम्, अपचनम् दमा, अङ्गभङ्गः, असंतोषः, निराशाजन्यमानसिकः रोगः च भवति। अयम् अपराधवृत्तिमारभ्य आत्महत्या पर्यन्तं कारयितुं समर्थः।

**वातश्लेष्मविकारपादविहितं चापत्तितन्द्राश्रमान्।**
**भ्रान्तिंकुक्षिरुगन्तरुष्णमृतकध्वंसं च पार्श्वाहतिम्।**
**भार्यापुत्रविपत्तिभङ्गविहतिं हृत्तापमर्कात्मजो।।**
**अ. 14 श्लो. 8**

**8. राहुः** - अयं वायुतत्त्वस्य मध्यमलम्बतायुक्तः ग्रहः अस्ति। अयं शरीरे रक्तं त्वचं वातञ्च प्रभावयति। अस्मिन् बलवति सति शरीरे स्फूर्तिः नवीनता चैतन्यता च स्यात्। निर्बले अशुभे रोगकारके च सति चेचकम्, कृमयः, मिर्गी, सर्पदंशः, पशुजन्यघातः, कुष्ठम्, कर्क रोगवत् असाध्यरोगः च भवति।

**स्वर्भानुर्हृदि तापकुष्ठविमतिं व्याधिं विषं कृत्रिमं,**
**पदगर्तिं च विशाचपन्नगमयं भार्यातमूजापदम्।।**
**अ. 14 श्लो. 9**

**केतुः** - अयं वायुतत्त्वस्य लघुलम्बतायुक्तः ग्रहोऽस्ति। अयं शरीरे वातं रक्तं चर्म च विशेषरूपेण प्रभावयति।

**कण्डूमसूरिरिपुकृत्रिमकर्मरोगैः**
**स्वाचारहीनलघुजातिगणैश्च केतुः।।**
**जातकपारिजात अ. 2 श्लो. 80**

अस्मिन् बलवति सति शरीरे श्रमशक्तिः, संघर्षशक्तिः, प्रतिरोधशक्तिः, सक्रियता च भवति। निर्बले सति घातः, व्रणम्, चर्मरोगः, जटिलरोगः, संक्रमणञ्च भवति।

**अध्यापिका**
**रा.उ.प्रा.सं.वि. प्रताप नगर**
**सैक्टर नं. 29, सांगानेर, जयपुर**
**1/102, मालवीय नगर, जयपुर**

1. फलदीपिका अ.-14 श्लोक-5
1. जातकपारिजातम् 2 श्लोकः 62
2. फलदीपिका अ. 14 श्लोकः 7
1. फलदीपिका अ.-14 श्लोकः 8
2. फलदीपिका अ. 14 श्लोकः 9
3. जातकपारिजातम् अ. 2 श्लोकः 80

# ज्योतिषशास्त्रे पाचनतन्त्ररोगविचारः ज्योतिषीययौगिकोपचारैः तन्निराकरणोपायाश्च

❑ नवनीतकुमारः

1. **यकृतः कार्याणि रोगाश्च :- यकृत् मानवशरीरे एका बृहद्ग्रन्थिः** (Largest) वर्तते। एषा ग्रन्थिः उदरस्य दक्षिणभागे (Diapheagm) इत्यस्य अधः भवति। अस्या अधिकतर भागः पसली इत्येनन आच्छादितो भवति। साधारणतया एकस्य वयस्कस्य यकृतः भारः तस्य शारीरिकभारस्य द्विप्रतिशतम् भवति अर्थात् पुरुषस्य यकृतः भारः1400-1800 ग्रामपरिमितः तथा च स्त्रीणां यकृतः भारः 1200-1400 ग्रामपरिमितः भवति। जन्मकाले बालकस्य यकृतः भारः प्रायशः तस्य शारीरिकभारस्य पञ्च प्रतिशतं भवति। इयं ग्रन्थिः भूसर वर्णीया भवति। इयमेव ग्रन्थिः मानवशरीरे रक्तं प्रवाहयति।

**।। यकृतः प्रमुखकार्याणि ।।**

पाचनक्रियायां यकृतः महत्वपूर्णं कार्यं भवति। अस्माकं शारीरिकरचनानुसारेण मुखं ग्रासनली (Alimentary canal), आमाशयः (Stomach), क्षुद्रान्त्रः (Small Intestine) इत्यादीनां कार्याणि यकृतः योगदानं विना सम्पूर्णानि न भवन्ति।

**।। यकृतः रोगाः ।।**

यकृतः विकृत्या मानवशरीरे विभिन्नाः रोगाः उपजायन्ते। संक्षेपेण तेषां रोगाणां विवरणम् अधः दीयते-

1. पाण्डु-कामलादि रोगे (Jaundice) :- यकृतः तरलपदार्थः पित्तः अत्यन्तलाभकारी भवति। परञ्च कदाचित् कष्टदायकः अपि भवितुं शक्नोति। पित्तस्य अंशः यदा रक्तवाहिनीषु प्रविशति तदा मानवः पाण्डुरोगेण पीडितो भवति।

2. यकृतः विकारेण आलस्यं, मन्दाग्निः, जिह्वा च मलिना भवति। अजीर्णं, शिरोवेदना शरीरे-निर्बलता, कण्डूः रक्तनिर्माणे अवरोधःइत्यादयः रोगाः उपजायन्ते।

3. यकृतः निर्बलता मानसिकं सन्तुलनं स्मृतौ न्यूनता, केशपतनं, यकृतः अर्बुदः, उदरवर्धनं इत्यादयः रोगाः मानवं पीडयन्ति। यकृतः विकारेण पादयोः स्थूलता, रक्ताल्पता, न्यून परिश्रमेण एव श्वासोच्छूनता, हिक्का इत्यादयः रोगाः भवति।

**।। पित्ताशयस्य कार्याणि रोगाश्च ।। ( Gall Bladder-Its Functions and Disorders )**

पित्ताशये मांसपेशीनां संकीर्णमुखयुक्तः पित्तस्य एकः स्यूतः (Reservoire of Bile) भवति। यस्य तुलना अमृतफलेन कर्तुं शक्यते। अयं यकृतः दक्षिणभागे तस्य पार्श्वे एव (Right Lobe of Liver) स्थितः भवति। यस्य आकारः 8-10 सें.मी. इति दीर्घः तथा च 3 से.मी. इति विस्तृतः भवति।

**।। ( पित्ताशयस्य कार्याणि ) ।।**

यकृतः निस्सृतः पित्तः पित्ताशये संचितो भवति। अतः अयं पित्तभाण्डागारं अपि उच्यते। अयं पित्ताशयः प्रारम्भिकावस्थायां प्रविष्टं पित्तं अत्यधिकं गाढं करोति।यदा अधिकवसायुक्तं भोजनं आमाशयात् क्षुद्रान्त्रे पाचनाय प्रविशति तदा स्वाभाविकमर्दनात् पित्ताशयः किंचिद् आकुंचयति। अनया क्रियया पित्ताशयात् पित्तं निस्सृत्य पित्तवाहिनी द्वारा (Bile Duct) शुद्रान्त्रस्य द्वारे आगच्छति। शुद्रान्त्रे प्रविश्य पित्तः भोजनं तरलीकृत्य

पाचनयोग्यं करोति। पित्ताशयस्य आकुंचन-प्रसरण-क्रियया पित्तप्रवाहः सम्यक् प्रचलति।

**।। पित्ताशयस्य रोगाः ।।**

**पित्ताशयस्य प्रमुखरोगाः** - पित्ताशये पाषाणखण्डाः भवन्ति अर्थात् पित्ताशये पाषाणखण्डवत् केचन कठोरपदार्थाः उत्पद्यन्ते। एते पदार्थाः कैलशियम / कालस्ट्रोल इत्यनेन उत्पन्ना भवन्ति। यकृतः पित्ताशये यः पित्तः आगच्छति। तस्मात् पित्ताशयः कोलस्ट्रोल इति खनिजलवणानि च संग्राहयति किन्तु रोगावस्थायां पित्ताशयः लवणानां ग्रहणं तु करोति परम् च कोलस्ट्रोलं इत्यस्य ग्रहणं न करोति। यैन कोल्स्ट्रोलं पित्ताशये एकत्रितं भूत्वा कठोरप्रस्तररूपेण तिष्ठति।

**।। आमाशयस्य रोगाः ।।**

**1. आमाशयरोग्रेषु उदरार्बुदः उदरपीडा च विशेषतया वर्तेते। 2. क्षुद्रान्त्रस्य अर्बुदः। 3. आन्त्रपीडा, आन्त्रशोथः, आन्त्रार्बुदश्च। 4. उण्डूकप्रदाहः। 5. वमनं-मन्दाग्निः। 6. रक्तार्शः।**

**।। पाचनतन्त्रस्य रोगाणां ज्योतिषीय कारणानि ।।**

1. उदरविकारस्य कारणं चन्द्रग्रहः भवति यदि चन्द्रे सिंहराशौ लग्ने षष्ठे स्थाने च स्थिते जातकः उदररोगेण पीडितो भवति।[2]

2. राहौः केतौ वा सप्तमे स्थाने स्थितेऽपि उदररोगः बाधते।[3]

3. यस्य जातकस्य जन्मकुण्डल्यां षष्ठस्थाने पापग्रहः, अष्टमभावे शनिशुक्रश्च स्यात् सप्तमभावे षष्ठेशः स्यात् तदा जातकःउदरपीडया पीड्यते।[4]

4. गुरौ तृतीये षष्ठमे भावे वा स्थिते अरुचिर्जायते।[5]

5. यदि लग्ने मंगलः षष्ठेच निर्बलः स्यात् तदा अजीर्ण भवति।[6]

6. षष्ठे अष्टमे वा स्थाने शुक्रेण युतः चन्द्रमा पापग्रहेण दृष्टः स्यात् जातकः मन्दाग्निना पीडितो भवति।[7]

7. यदि द्वयोः पापग्रहयोः मध्ये चन्द्रमा स्यात् सप्तमे स्थाने शनिश्च स्यात् तर्हि जातकः गुल्मरोगेण पीडितो भवति।[8]

8. यदि षष्ठेशः चन्द्रः पापग्रहेण दृष्टः स्यात् तथा च तस्योपरि शुभग्रहस्य दृष्टिः न स्यात् तदा जातकः प्लीहारोगेण पीडितो भवति।[9]

9. शुक्रेण अदृष्टः लग्नेशः अस्तः स्यात्, क्रूरग्रहेण दृष्टः स्यात् तथापि प्लीहारोगः भवति।

10. लग्नेशः अथवा सप्तमेशः चन्द्रमा केवल क्रूरगहाणां दृष्टिः स्यात् तदापि प्लीहा रोगो भवति।[10]

**।। यौगिकक्रिया-योगमुद्रासनप्राणायामैश्च रोगाणां शान्तिविचारः ।।**

आयुर्वेदानुसारेण स्वस्थपुरुषस्य लक्षणमस्ति यत्-

**समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ।।**[11]

समता एव योगस्य सृष्टिव्यवस्थायाश्च मूलाधारः। विषयमतया एव विकारः उत्पद्यते। हठयोगानुसारेण भौतिकशरीरस्य विकाराः षट्कर्मभिः, आसनैः, प्राणायामेन, मुद्राणां धारणया ध्यानेन वा दूरीकर्तुं शक्यते तथा वातपित्तकफादीनां समञ्जनं षट्कर्मणा क्रियते।

**धौतिर्बस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा।**
**कपालभातिश्चैतानि षट्कर्माणि प्रचक्षते ।।**[12]

**धौति** - धौतिक्रियया आमाशयपर्यन्तं मार्गं स्वस्थं कृत्वा कफसम्बन्धिनः सर्वान् रोगान् दूरीकर्तुं शक्यते।

2. बृहद्जातक अ. 17 श्लोक 5, 3. जातक तत्त्व-षष्ठ विवेक सू.51
4. गदावली अ. श्लोक 28, 5 सारावली अ. 3 श्लोक 52/55
6. जातकपारिजात अ. 6 श्लोक 90, 7. गदावली अ. 2 श्लोक 29
8. सारावाली अ. 34 श्लोक 74, 9. जातकालंकार अ. 2 श्लोक 43
10. 9,10 जातकतत्त्व षष्ठ विवेक-सू. 47-48,
11. सुश्रुत संहिता 15/48, 12. हठयोग 3.2 श्लोक 22

**लाभः** - कासश्वासप्लीहकुष्ठं कफरोगाश्च विशन्ति। धौतिकर्मप्रभावेन प्रयात्येव न संशयः।।

**नौलिः**- मन्दाग्निसंदीपन पाचनादिसंधापिकानंदकरी सदैव। अशेषदोषामयशोषणी च हठक्रिया मौलिरियं च नौलिः।।[13]

पित्तदोषस्य निवारणाय गजकर्णी गुञ्जनादि च क्रिया लाभकारिणी भवति। अस्यां क्रियायां शौचादिक्रियाभिः निवृत्तिं प्राप्य लवणमिश्रितं पर्याप्तं जलं पीत्वा वमनं क्रियते। आमाशयस्थस्य पित्तस्य शोधनं भवति। अग्निसारक्रियया मन्दाग्निः दूरीकर्तुं शक्यते।

**उदरस्य मृत्पट्टिका**- 1 फुट इति दीर्घां 6-8 ईंच इति विस्तृतां ½ ईंच इति स्थूलां च पट्टिकांनिर्माय नाभिस्थानात् अधः उदरस्य मध्ये स्थापनीया। मेरूदण्डे, शिरसि, उदरे च युगपदेव मृत्पट्टिका-स्थापनेन, शिरोवेदना, रक्तचापः, ज्वरः मूर्च्छा, अनिद्रा, नपुंसकता, मूत्ररोगादीनां च निवारणं भवति।

**उदररोगस्यासनानि**- सूर्यनमस्कारः, शीर्षासनं माला च, सर्वांगासनं तथा च तस्य माला, उत्तानासनं जठरपरिवर्तनासनम्, अर्धनावासनं, परिपूर्णनावासनं, वीरासनं, सुप्तवीरासनं, महामुद्रा चेति आहत्य अष्टवारं उड्डीयानबन्धः करणीयः। योगाभ्यासेन शरीरस्य प्रत्येकस्यां सूक्ष्मातिसूक्ष्मनाड्यां रक्तप्रवाहः सुचारुरुपेण भवति। स्नायु संस्थानं च बलं प्राप्नोति।

**ज्योतिषीयसमाधानम्**- जातकस्य जन्मकुण्डल्यां उदररोगकृते प्रमुखतया चन्द्रमा-बुध-गुर्वादिग्रहाणां विशेषयोगदानं भवन्ति। गुरुग्रहस्य धनुराशिरपि यकृतभागस्य प्रतिनिधित्वं करोति। यकृदपि पाचन-संस्थानस्य प्रमुखमङ्गमस्ति। अतः जातकस्य कुण्डल्यां यः ग्रहः दूषितः भवति। तस्य अशुभदोषनिवारणार्थं शुभत्ववृद्धिकरणार्थं च सूर्यादिग्रहाणां रत्न-यन्त्र-मन्त्रोषधि-व्रतोपासनादिभिश्च समाधानं करणीयम्।

अतः इदं सत्यमस्ति यत् यथा पुरा ज्योतिषायुर्वेदयोः सम्मिलिताध्ययनेन रोगशमनार्थ दीर्घायुष्य-प्राप्त्यर्थं च मानवः प्रयत्नशीलः आसीत् तथैव आधुनिक-चिकित्सानुसन्धानेषु ज्योतिषशास्त्रस्यापि अध्ययनं भवेत् येन ज्यौतिषशास्त्रमपि चिकित्साक्षेत्रे महत् स्थानं प्राप्नुयात्। चिकित्साक्षेत्रे ज्योतिषः, देशकालप्रमाणस्य च महत्त्वं किमिति विषयेऽस्मिन् चरकसंहितायाम् उल्लेखोऽस्ति-

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पज्ज्ञानपूर्वं समाचरेत्।। यस्तु रोगविज्ञाय कर्माण्यारभते भिषक्। अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया।।यस्तु रोगविशेषज्ञः सर्वभेषज्यकोविदः। देशकालप्रमाणज्ञस्तस्य सिद्धिरसंशयम्।।[14]

**शोधछात्रः**
**ज्योतिषविभागः, राष्ट्रिय संस्कृत संस्थानम्,**
**जनकपुरी डी-ब्लाक, नई दिल्ली**

13. हठयोगप्रदीपिका 34
14. चरकसंहिता, पृष्ट 115, अध्याय 20 श्लोक 20-22

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारती**

खाता संख्या - **2139101912502**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# कुत्र ते दिवसा गताः

❑ डॉ. राजेश्वरी भट्ट

नास्त्यत्र संदेहस्य लेशो यत् करतलप्रमाणयुक्ते लघ्वाकारे मोबाइलफोन इति नाम्नि यान्त्रिके उपकरणे अद्य निखिलं विश्वं समाहितं जातम्। यन्त्रस्यास्योपयोगेन जगति नतु किमपि दूरं नैव च अज्ञातं वर्तते। 'मोबाइलफोन' यन्त्रस्य माध्यमेन न केवलं भारतवर्षे अपितु दूरातिदूरे किमधिकं पारे समुद्रस्य वसतां आत्मीयानां साक्षात्कारः, सहैव परस्परं वार्तालापः सुलभो जातः। विज्ञान-दर्शन-चिकित्सा-कला-पर्यावरणादीनां सहैव अन्येषां विविधक्षेत्राणां ज्ञानप्रदायकं मोबाइलयन्त्रं अद्य मानवमात्रस्य कृते अनिवार्यं जातम्। आबालवृद्धाः सर्वे जना अस्योपयोगेन कृतार्थान् स्वात्मनो मन्यन्ते। किन्तु दृश्यते यत् मानवानां सुखाय सुविधायै च आविष्कृतं विशेष लाभप्रदं यन्त्रमिदं इदानीं तेषां कृते दुःखस्य दुविधायाश्च कारणं जातम्। सल्लक्ष्यमाधारीकृत्य वैज्ञानिकैर्निर्मितस्यास्य यन्त्रस्य दुरुपयोगेन अधिकाधिप्रयोगेण वा अनेके परिवाराः प्रभाविताः पीड़िताश्च जाताः। मानवाः आत्मनः कुटुम्बमुपेक्ष्य 'मोबाईलफोन' माध्यमेन नवनवीनैः कुटुम्बैः सह सम्बद्धा जाताः। येन परिवारेभ्यः आमोदः प्रमोदः प्रसन्नता च पलायिता जाता। सप्ताहपूर्वमहं कस्यचित् परिचितस्य गृहमगच्छम्। मोबाइलफोनं प्रति पुत्रस्य अधिकतरां संलग्नतां दृष्ट्वा सा जननी आत्मानमुपेक्षितामिवामन्यत। तस्याःकथनेन ज्ञातं यद् पूर्वं तु तस्याः पुत्रो जनन्या सह वार्तालापेन किञ्चित्कालं अत्यवाहयत्। किन्तु इदानीं जनन्याः कृते तस्य समीपे क्षणमपि न वर्तते। एवमेव 'मोबाइलफोन' इति यन्त्रस्य प्रचारप्रसारपूर्वं बालका विद्यालयेभ्यः गृहमागत्य अभिभावकैः सह समयं यापयन्तः प्रमोदमन्वभवन् किन्तु अधुना-अभिभावकैः भूयो भूयो वार्यमाणा अपि 'मोबाईलफोन' माध्यमेन भ्रामकचित्राणि पश्यन्ति। घातकान् समाचारान् शृण्वन्ति। यैः प्रभाविता युवकाः काल्पनिके जगति भ्रमन्तः अन्ते निष्फला वंशदीपका आत्मान एकाकिनं मन्यमानाः किमप्यकरणीयमाचरन्ति। मोबाइल-फोनयन्त्रं सम्प्रति दम्पत्योर्मध्ये कलहस्य कारणमपि जातम्। सायंकाले कार्यस्थलादागतेन भर्त्रा सह सुखवार्तायै सोत्सुका पत्नी यदा 'मोबाइलफोन' यन्त्रं प्रति सहचरस्य आत्मनोऽप्यधिकामपेक्षामनुभवति तदा शनैः शनै तस्य व्यवहारेण क्षुब्धा पत्नी धैर्यं विजहाति परिणामतः तयोगृर्हमन्दिरं अक्षवाटो भवति। सम्प्रति राष्ट्रे जाता लेवजिहाद घटना, मोबाइलफोन यन्त्रस्य दुरुपयोगस्य परिणामो वर्तते। एतदतिरिक्तं मोबाइलफोन यन्त्रस्य अधिकाधिकप्रयोगेण शरीरे अनेके विकारा जायन्ते। अतः जीवने अशान्तिकरस्य मोबाइलफोन इति यन्त्रस्य उपयोगं प्रति अस्माभिः सावहितैः भवितव्यम्।

## हिन्दी अनुवाद

एक हथेली प्रमाण वाले छोटे से 'मोबाइलफोन' नामक यान्त्रिक उपकरण में आज सम्पूर्ण विश्व समाहित है इसमें तनिक भी सन्देह नहीं है। इस यन्त्र के उपयोग से जगत् में न कोई वस्तु अज्ञात है और न कोई स्थान दूर हैं। 'मोबाइल फोन' के माध्यम से न केवल भारत में अपितु दूरातिदूर अथवा समुद्र के पार रहने वाले आत्मीयजनों का साक्षात्कार एवं परस्पर वार्त्तालाप सुलभ है। विज्ञान-दर्शन-चिकित्सा-कला पर्यावरण विषयों एवं अन्य विविध क्षेत्रों का ज्ञान कराने वाला मोबाइल यन्त्र आज मानवमात्र के लिए अनिवार्य हो गया है। आबालवृद्ध सभी इसके उपयोग से अपने को कृतार्थ समझते हैं। किन्तु मानवमात्र के सुख एवं सुविधा के लिए आविष्कृत 'मोबाइल फोन' आज मानव के दुःख एवं दुविधा का कारण हो गया है। वैज्ञानिकों के द्वारा उन्नत लक्ष्य को आधार बना कर आविष्कृत मोबाइल फोन के अधिक प्रयोग से अथवा दुरुपयोग से आज अनेक परिवार पीड़ित

एवं प्रभावित प्रतीत होते हैं। मानव अपने कुटुम्ब की उपेक्षा एवं नवीन कुटुम्बों के साथ सम्बद्ध हो रहे है। जिससे परिवारों से आमोद-प्रमोद एवं प्रसन्नता पलायन कर रही है। एक सप्ताह पूर्व मैं अपने किसी परिचित के घर गई थी वहाँ उसकी माता अपने पुत्र की 'मोबाइल फोन' पर अधिक व्यस्तता के कारण अपने को उपेक्षित अनुभव कर रही थी। कुछ समय बातचीत से ज्ञात हुआ कि 'मोबाइल फोन' के प्रयोग से पूर्व उसका पुत्र कुछ समय माता के साथ बातचीत में व्यतीत करता था किन्तु अब उसके पास अपनी माँ के लिए कुछ क्षण भी नहीं है। इसी प्रकार 'मोबाइल फोन' के प्रचार प्रसार से पहिले बच्चे विद्यालयों से घर लौटकर अपने अभिभावकों के साथ समय व्यतीत करते थे किन्तु अब अभिभावकों के द्वारा बार-बार रोके जाने पर भी मोबाइल फोन के माध्यम से भ्रामक चित्र देखते हैं, घातक समाचार सुनते हैं। जिसे प्रभावित ये युवक काल्पनिक जगत् में भ्रमण करते हैं एवं अन्त में निष्फल होकर अपने को एकाकी समझकर कुछ भी अकरणीय करने में भयभीत नहीं होते है। मोबाइल फोन आजकल पति पत्नी के बीच कलह का कारण बन गया है। दिनभर के पश्चात् कार्यस्थल से आए हुए अपने पति के साथ सुखवार्ता के लिए समुत्सुक पत्नी जब अपने पति को मोबाइल फोन में अत्यधिक व्यस्त देखती है तो वह अपने को उपेक्षित समझती है। पति के रूक्ष व्यवहार से पत्नी के धैर्य का बाँध टूट जाता है और उनका गृहमन्दिर अखाड़े मे बदल जाता है। आजकल राष्ट्र में घटित 'लव जिहाद' जैसी घटनाएँ मोबाइल फोन के दुरुपयोग का दुष्परिणाम है। इसके अतिरिक्त मोबाइल फोन के अधिकाधिक प्रयोग से शरीर में विकार उत्पन्न होते हैं। अत: जीवन में अशान्तिकारक मोबाइल फोन के उपयोग के प्रति हमें सावधान होना चाहिए।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

# गीता-पाठ प्रतियोगिताया-आयोजनम्

**❑ सन्तोष शर्मा**



गुरुवासरे (18-01-2018 दिनाङ्के) राजगङ्गा चेरिटेबल टस्ट्र एवं राजकीय महाराज वरिष्ठोपाध्याय संस्कृत विद्यालय: इत्यनयो: संयुक्ततात्वावधाने गीता-पाठ-प्रतियोगिताया: आयोजनं राजकीय महाराज उपाध्यायसंस्कृत-विद्यालये जातम्। प्रतियोगितायामस्यां पञ्चविंशति: प्रतिभागिन: भागं गृहीतवन्त:। राष्ट्रिय-संस्कृतसंस्थानस्य छात्र: सुखदेव शर्मा प्रतियोगितायां प्रथमं स्थानं प्राप्तवान्, दिल्ली पब्लिकस्कूल इत्यस्य छात्रा 'रानियाँ सैन' द्वितीयं स्थानं तथा स्थानीयविद्यालयस्य छात्र: 'कौशलेन्द्र जैमिनि:' तृतीयं स्थानं प्राप्तवान्। पारितोषिक रूपेण प्रथम स्थानस्य कृते एकविंशतिशतं रूप्यकाणि, द्वितीयस्थानस्य कृते एकविंशतिशतं रूप्यकाणि तथा तृतीयस्थानस्य कृते एकादशशतं रूप्यकाणि प्रदत्तानि। कार्यक्रमे राज. ट्रस्ट इत्यस्य संस्थापिका डॉ. राजेश्वरी भट्ट महोदया गीताया: महत्वं प्रतिपादितवती। संस्कृत-भारती जयपुर प्रान्तस्य उपाध्यक्ष: श्री नाथुलाल सुमनमहोदय: उक्तवान् यत् वर्तमाने सर्वासां समस्यानां समाधानं गीतायामेव अस्ति। प्रो. ताराशंकर पाण्डेय महोदय: उक्तवान् यत् सुख-दु:खेषु वयं समत्वयुक्ता: भवेम। संस्कृतभारती जयपुर-प्रान्तस्य अध्यक्ष: श्री हरिशंकर भारद्वाजमहोदय:उक्तवान् यत् गीता विश्वस्य सर्वश्रेष्ठ: ग्रन्थोऽस्ति। संस्कृत-भारती-जयपुरमहानगरस्य अध्यक्ष: श्री प्रकाश शर्मा महोदय: उक्तवान् यत् गीतायां सकारात्मक विचाराणां समावेशोऽस्ति, ते विचारा: वर्तमाने लाभदायका: सन्ति। निर्णायकरूपेण डॉ. सी.पी. शर्ममहोदय:, श्री के.के. शर्ममहोदय: एवं श्रीसंतोषशर्ममहोदय: आगतवन्त:। संस्था-प्रभारी डॉ. संतोषकुमार शर्मामहोदय: अध्यक्षीयभाषणे सर्वेषाम् अतिथीनां धन्यवादम् आभारञ्च प्रकटितवान्। मञ्चसंचालनं डॉ. अवनेन्द्र डागर एवं डॉ. देवीप्रसादशर्ममहोदयौ कृतवन्तौ।

**प्रधानाचार्य:**
**राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय:, जयपुरम्**
**मो.: 9414775347**

आयुर्वेद-स्तम्भः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

# आमलकममृतफलम्

**क्रमेऽस्मिन् पूर्वं तु लेखद्वये संसूचितं यदामलकं रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनफलप्रदञ्च भवति, विशेषेण तु त्रिदोषजिद् धात्रीफलं दाहप्रशमनं करोति। आधुनिकाः वैज्ञानिकाः कथयन्ति यदामलकी फले 'विटामिन सी' इति तु प्रचुरमात्रायां भवति। अस्मिन् फले 'विटामिन सी' इतिवद् यत्कार्मुकं तत्त्वं भवति तत्तु उष्णीकरणेऽपि न विनश्यति, अन्यथा तु उष्णीकरणेनान्यत्र सर्वत्र 'विटामिन सी' इत्यस्य विनाशो भवति। अस्मादेव हि कारणादिदमायुष्यं रसायनात्मकञ्च भवति। 'विटामिन सी' इति त्वाधुनिकानां मते 'एण्टी आक्सीडेन्ट' भवति। एषा हि भावात्मिका संज्ञा। अनेन स्वास्थ्यसंवर्धनं रोगप्रतिरोधकक्षमताया-श्चाभिवर्धनं भवति। आधुनिकाः संसूचयन्ति यद् आमलकी फले बहूनि श्रेष्ठानि तत्त्वानि प्राकृतरूपेण समुपस्थितानि सन्ति, यैः शरीरे श्रेष्ठानां भावानाम-भिवृद्धिरुत्प्रेरणञ्च भवति।**

इस क्रम में पहले तो दो लेखों में सूचित किया गया है कि आँवला रक्तपित्त और प्रमेह को नष्ट करने वाला तथा अत्यन्त वृष्य होता है और रसायन का फल देने वाला होता है, विशेष रूप से तो त्रिदोष को जीतने वाला आँवला दाह का प्रशमन करता है। आधुनिक वैज्ञानिक कहते हैं कि आँवले में 'विटामिन सी' तो प्रचुर मात्रा में होता है। इस फल में विटामिन सी की तरह जो कार्मुक तत्त्व होता है वह तो गर्म करने से भी नष्ट नहीं होता है, अन्यथा तो गर्म करने से अन्यत्र सभी जगह विटामिन सी का नाश होता है। इसी कारण से ही यह आयुष्य और रसायन स्वरूप का होता है। विटामिन सी तो आधुनिकों के मत में 'एण्टी ऑक्सीडेन्ट' होता है। यह भावात्मक संज्ञा है। इस से स्वास्थ्य संवर्धन तथा रोग प्रतिरोधक क्षमता का अभिवर्धन होता है। आधुनिक सूचित करते हैं कि आँवला में अनेक श्रेष्ठ तत्त्व प्राकृतरूप से रहते हैं, जिनसे शरीर में श्रेष्ठ भावों की अभिवृद्धि और (उनका) उत्प्रेरण होता है।

**आमलकं हि शरीरे 'कैल्शियम' इत्यस्याव-शोषणे सहायकं भवत्यत एवास्थिषु दृढतामापा-दयति। शरीरे लोहतत्त्वस्यावशोषणे साहाय्य-मेतद्रक्तवृद्धिं करोति। अस्य परिपाचनमान्त्रे विशेषेण भवति, आन्त्रगतिवृद्धिकारकं ह्येतन्मृदुविरेचकं भवति। आधुनिकाः कथयन्ति यत् 'विटामिन सी' इत्यस्यान्त्रे शीघ्रमवशोषणं कोशिकासु च त्वरितं वितरणं भवति। 'प्रोटीन' इत्यस्य पाचने विश्लेषणे चाप्युपयोगीदं पाचकरसानां निर्माणेऽपि सहायतां करोति। रक्तस्रावमुपरुणद्धि, यकृन्नामकस्यावयव-स्य साहाय्येन 'कोलेस्टरोल' इत्यस्य ह्रासं करोति। प्रतिश्यायकासयोश्च विनाशकमिदं 'विटामिन सी' नामकं तत्त्वं रोगप्रतिरोधकक्षमताया अभिवर्धनं करोति।अस्थ्नां दन्तानामपि दृढ़ीकरणे श्रेष्ठमिदं तत्त्वम्। एतद्धि तत्त्वमामलकीफले विशेषेण राजते, अतः सर्वाण्येतानि कर्माणि विशेषेण श्रेष्ठ-रूपेण सम्पादयत्यामलकी-फलम्। बहवः गुणाः सन्त्या-मलकीफलेऽस्मादेव कारणात् प्राचीनैरस्य संज्ञा 'अमृतफलम्' इति कृता।**

आँवला शरीर में 'कैल्शियम' के अवशोषण में

सहायक होता है इसलिए यह अस्थियों में दृढता लाता है शरीर में लोहतत्त्व में सहायक यह रक्तवृद्धि करता है। इसका परिपाचन आन्त्र में विशेषरूप से होता है, आन्त्र की गति को बढ़ाने वाला यह मृदुरेचक होता है। आधुनिक कहते है कि विटामिन सी का आन्त्र में शीघ्र ही अवशोषण होता है और कोशिकाओं में शीघ्र ही वितरण होता है। प्रोटीन के पाचन में और विश्लेषण में भी उपयोगी यह पाचकरसों के निर्माण में भी सहायता करताहै। रक्तस्राव को रोकता है और यकृत् नामक अवयव की सहायता से कोलेस्टरोल को कम करता है। जुकाम और खाँसी का नाश करने वाला यह विटामिन सी नामक तत्त्व रोगप्रतिरोधक क्षमता को भी बढ़ाता है। यह तत्त्व अस्थियों को और दाँतों को भी दृढ़ करने में श्रेष्ठ है। यह तत्त्व आँवले में विशेष रूप से रहता है। आँवले में अनेक गुण होते हैं इसीलिए प्राचीनों ने इसकी संज्ञा अमृतफल की है।

**केषाञ्चिदामलकीफल-प्रयोगाणामत्रोल्लेखः क्रियते -**

**1. खण्डामलकम् -**

**'भैषज्यरत्नावली' इत्याख्ये ग्रन्थे शूलरोगाधिकारे प्रोक्तो ह्येष खण्डात्मको योगः विशेषेण विधिना निर्मीयते, अत एव भैषज्यकल्पनायां दक्षाः चिकित्सका एवास्य निर्माणं कुर्वन्ति। योगे स्विन्नपीडितानि कूष्माण्डखण्डानि भवन्ति, अत्र हि विशिष्टेन विधिनाऽऽमलकीरसे परिपक्वा शर्करात्मिका मत्स्यण्डिका प्रक्षिप्यते। कणाजाजीशुण्ठी-मरिचतालीशधन्याकचातुर्जातकेत्यादीनां द्रव्याणां चूर्णमप्यत्र प्रक्षेपरूपेण निक्षिप्यते। खण्डस्वरूपे विनिर्मितो ह्येषः योगोऽति-स्वादिष्टो भवति। चिकित्सकेन विनिर्मितस्यास्य खण्डात्मकस्य योगस्य प्रयोगश्चिकित्सकस्यैव निर्देशेन 10 ग्रामात्मिकायां मात्रायां प्रातःकाले सायङ्काले च करणीयः। योगेऽस्मिन् पाक्षिकस्यापि संयोगो भवति। श्वासकासारोचकाणां विनाशकमेतत् खण्डामलकं विशेषेण दोषत्रयभवं पक्तिशूलं विनाशयति। छर्द्यम्लपित्तमूर्च्छा रक्तपित्तादींश्च निहन्त्येतत्रसायनस्वरूपात्मकं खण्डामलकं हृच्छूलं पृष्ठशूलञ्चापि नाशयति। रक्तवर्धकमेतन् बलञ्चाप्य-भिवर्धयति।**

**2. आमलकीक्वाथः -**

**15 ग्रामपरिमितं शुष्क-मामलकचूर्णं गृहीत्वा विधिपूर्वकं तस्य क्वाथः 400 मि.लि. परिमिते जलेविधेयः। अष्टमांशावशिष्टेऽस्मिन् क्वाथे विंशतिग्रामपरिमितं गुडं प्रक्षिप्य वस्त्रपूतस्य शीतीकृतस्यास्य पानेन मूत्रकृच्छ्रनिवारणं भवति। श्रमध्नः तर्पणात्मको ह्येषः क्वाथः पित्तासृग्दाह-शूलानां निवारणमपि करोति। अल्पमात्रायामपि (5-10 ग्राम) लाभप्रदो भवत्येष क्वाथः।**

यहाँ आँवले के कुछ प्रयोगों को उल्लेख किया जा रहा है-

**1. खण्डामलक -**

भैषज्यरत्नावली नामक ग्रन्थ में शूलरोगाधिकार में कहा गया यह खण्डामलक योग विशेष विधि से निर्मित किया जाता है। इसलिए भैषज्यकल्पना में दक्ष चिकित्सक ही इसका निर्माण करते हैं, इस योग में उबाल कर निचोड़े गए कूष्माण्ड (सफेद पेठा, कद्दू) के टुकड़े होते हैं। इसमें विशेषविधि से आँवले के रसमें पकाई गई शक्कर से बनी चासनी डाली जाती है। पिप्पली, काला

जीरा, सोंठ, मरिच, तालीश पत्र, धनिया, दालचीनी, इलायची, तेजपत्ता, नागकेशर इत्यादि द्रव्यो का चूर्ण इसमें प्रक्षेप रूप से डाला जाता है। खण्डरूप में बनाया गया यह योग अत्यन्त स्वादिष्ट होताहै। चिकित्सक के द्वारा बनाए गए इस खण्डस्वरूपक योग का प्रयोग चिकित्सक के निर्देश से10 ग्राम की मात्रा में प्रातःकाल आधे़ सायंकाल करना चाहिए। इस योग में शहद भी मिलाया जाता है। श्वास, कास, अरोचक को नष्ट करने वाला यह खण्डामलक विशेष रूप से त्रिदोष से उत्पन्न होने वाले परिणाम शूल को नष्ट करता है। वमन, अम्लपित्त, मूर्च्छा और रक्तपित्तादि को यह नष्ट करता है। रसायन स्वरूप वाला यह खण्डामलक हृच्छूल और पृष्ठशूल को भी नष्ट करता है। रक्तवर्धक यह योग बल को भी बढाता है।

**2. आमलकी क्वाथ –**

15 ग्राम की मात्रा में सूखे आँवले के चूर्ण को लेकर विधिपूर्वक उसका क्वाथ 400 मि.लि. जल में बनाना चाहिए। अष्टमांश अवशिष्ट रहने पर इस क्वाथ में गुड़ बीस ग्राम की मात्रा में डालकर कपड़े से छाने हुए ठण्डा किए हुए इस क्वाथ को पीने से मूत्रकृच्छ्र दूर होता हैं। थकान को दूर करने वाला तर्पण करने वाला यह क्वाथ पित्त, रक्तविकृति, दाह और शूल को दूर करता है। अल्पमात्रा में भी (5 से 10 ग्राम) भी यह क्वाथ लाभदायी होता है।

**3. धात्र्यादि क्वाथः –**

**धात्री द्राक्षा विदारी च यष्ट्याह्वं तथा गोक्षुरं प्रत्येकं पञ्चग्रामपरिमितं गृहीत्वा कषायं विपचेत्। शीतीभूतेऽस्मिन् कषाये दशग्रामपरिमितां सितां सम्मिश्र्य पाययेत्। कषायेनानेन जीर्णस्यापि मूत्रकृच्छ्रस्य निवारणं भवति।**

**4. बृहद् धात्र्यादिक्वाथः –**

**धात्री द्राक्षा च यष्ट्याह्वं विदारी, गोक्षुरञ्चैत-दुपर्युक्तं द्रव्यपञ्चकं गृहीत्वा दर्भमिक्षुमूलं तथाभयां समानमात्रायां गृह्णीयात्। प्रत्येकस्य द्रव्यस्य ग्रहणं ग्रामत्रयपरिमितायामेव मात्रायां करणीयम्। क्वाथद्रव्यवत् स्थूलस्वरूपे कुट्टयित्वा समग्रस्यास्य द्रव्यसमूहस्य क्वथनं 400 मि.लि. परिमिते जले करणीयम्। अष्टमांशावशिष्टेऽस्मिन् शीतीभूते कषाये दशग्रामपरिमितां सितां सम्मिश्र्य पाययेत्। अनेन रुजादाहलक्षणसंयुक्तस्य मूत्रकृच्छ्रस्यापनयनं भवति।**

**3. धात्र्यादिक्वाथ –**

आँवला, मुनक्का, बिदारी, मुलहठी और गोखरू प्रत्येक को पाँच ग्राम की मात्रा में लेकर क्वाथ बनाना चाहिए। ठण्डा हो जाने पर इस क्वाथ में दशग्राम मिश्री मिलाकर पिला देना चाहिए। इस क्वाथ से पुराना भी मूत्रकृच्छ्र (कठिनता से मूत्रत्याग करना) का निवारण होता है।

**4. बृहद् धात्र्यादि क्वाथ –**

आँवला, मुनक्का, मुलहठी, विदारी और गौखरू ये उपर्युक्त पाँच द्रव्य लेकर डाभ और ईख की जड़ एवं हरड़ को समान मात्रा में लेना चाहिए। प्रत्येक द्रव्य को तीन ग्राम की मात्रा में ही लेना चाहिए। क्वाथ द्रव्य की तरह मोटा-मोटा कूट कर इस सम्पूर्ण द्रव्यसमूह को 400 मि.लि. पानी में उबालना चाहिए। अष्टमांश अवशिष्ट रहने पर ठण्डे हुए इस क्वाथ में दश ग्राम मिश्री मिलाकर पिलाना चाहिए। इस से पीड़ा और जलन के साथ होने वाला मूत्रकच्छ्र दूर होता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

**निर्माता**

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26961849, 26962653
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, अमरापुरा, जयपुर
फोनः 0141-4019691, 2370566, फैक्स : 0141-2369691
जयपुर चादरें कार्यालयः 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, अमरापुरा, जयपुर
फोनः 0141-4019691, 2370566, फैक्स : 0141-2369691
E-mail ID : sharma.ashok@kanoria.org

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक **पाञ्चजन्य**

बात भारत की

**हमारी विशेषताएं**

(English) Weekly **Organiser**



- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

**वार्षिक ग्राहक शुल्क**

**भारत में** ₹ 700/- (साधारण डाक द्वारा) • ₹ 820/- (स्थानीय वितरक द्वारा)

**विदेशों में** $ 70 (हवाई डाक द्वारा)

REACH MILLIONS OF CONSUMERS THROUGH OUR WEEKLIES


**प्रसार विभाग**

## भारत प्रकाशन (दिल्ली) लिमिटेड

2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली–11005
फोन : 011-47642000, 01, 02 E-mail : circ@bpdl.in

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,